शिक्षा का अधिकार

सर्व शिक्षा अभियान
सब पढ़ें सब बढ़ें

# वर्तिका

# 7



उत्तर प्रदेश बेसिक शिक्षा परिषद्

# वर्तिका - 7

(कक्षा 7 के विद्यार्थियों के लिए)

# वन्दना



जय जय हे भगवति सुरभारति!

तव चरणौ प्रणमामः ।

नादतत्त्वमयि ! जय वागीश्वरि!

शरणं ते गच्छामः ।। 1 ।।

त्वमसि शरण्या त्रिभुवनधन्या

सुरमुनिवन्दितचरणा।

नवरसमधुरा कवितामुखरा

स्मितरुचिरुचिराभरणा ।। 2 ।। जय जय...........।

आसीना भव मानसहंसे

कुन्दतुहिनशशिधवले!

हर जडतां कुरु बुद्धिविकासं

सितपङ्कजरुचिविमले! ।।3 ।। जय जय...........।

ललितकलामयि ज्ञानविभामयि

वीणापुस्तकधारिणि!

मतिरास्तां नो तव पदकमले

अयि कुण्ठाविषहारिणि ! ।। 4 ।। जय जय...........।




सुरभारति = हे देववाणी, सरस्वती देवी ! नाद-तत्त्वमयि = नादब्रह्मस्वरूप वाली। शरण्या = शरण देने वाली। नवरसमधुरा = शृङ्गारादि नवरसों से मनोहर । मुखरा = मुखरित। स्मितम् = मुस्कान। रुचिः = कान्ति। रुचिराभरणा = सुन्दर आभूषणों से युक्त। आसीना =विराजमान। कुन्दः = कुन्द फूल। तुहिनम् = बर्फ। सितम् = सफेद। विभामयि = प्रकाशस्वरूपा। नः = हमारी। अयि = हे। कुण्ठाविषहारिणि = कुण्ठारूपी विष को दूर करने वाली।

अन्वय:

जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः। हे नादतत्त्वमयि! वागीश्वरि! ते शरणं गच्छामः।। 1 ।।

त्वं शरण्या त्रिभुवनधन्या सुरमुनिवन्दितचरणा नवरसमधुरा कवितामुखरा स्मितरुचिरुचिराभरणा असि।। 2 ।। जय जय...........

हे कुन्दतुहिनशशिधवले! सितपङ्कजरुचिविमले! मानसहंसे आसीना भव, जडतां हर, बुद्धिविकासं कुरु ।।3 ।। जय जय...........

हे ललितकलामयि ज्ञानविभामयि वीणापुस्तकधारिणि! कुण्ठाविषहारिणि ! तव पदकमले नो मतिः आस्ताम् ।। 4 ।। जय जय हे भगवति सुरभारति ! तव चरणौ प्रणमामः ।

भावार्थः

हे भगवती सरस्वती देवि ! तुम्हारी जय हो। हम तुम्हारे चरणों में प्रणाम करते हैं। नाद ब्रह्मस्वरूप वाली हे वागीश्वरि ! तुम्हारी जय हो। हम सब तुम्हारी शरण में जाते हैं। ।।1।।

हे देवि ! तुम आश्रय देने वाली हो। तुम तीनों लोकों में धन्य हो। तुम मुनियों तथा देवताओं द्वारा

पूजित चरणों वाली हो । तुम नौ मधुर रसों से युक्त कविता (काव्य) करने वाली हो। तुम प्रसन्न तथा

सुन्दर आभूषणों से युक्त हो। ।।2।।

कुन्द, फूल, बर्फ (श्वेत ओस) एवं चन्द्रमा के समान धवल तथा श्वेत कमल के समान आभा वाली हे देवि!

हमारे मानस हंस पर आसीन होकर, मेरी जड़ता को हर लो तथा बुद्‍धि का विकास करो। ।।3।।

हे वीणा पुस्तक धारण करने वाली देवि ! तुम ललित कला से युक्त तथा ज्ञानरूपी प्रकाशस्वरूपा हो। हे कुण्ठा रूपी विष को दूर करने वाली देवि ! तुम्हारे चरण कमलों में मेरी मति (आस्था) रहे। ।।4।।

**शिक्षण-सङ्केतः**

(क) वन्दनापद्यानां समूहगानं कारयत।

## प्रथमः पाठः चित्रपाठः (ऋकारान्तः इकारान्तः उकारान्तश्च शब्दः)

| **पुंल्लिङ्गम्** | | |
|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् |
|  |  |  |
| पिता फलं ददाति।<br>एषः फलं ददाति। | नेतारौ फलानि दत्तः।<br>एतौ फलानि दत्तः। | नेतारः वस्त्राणि ददति।<br>एते वस्त्राणि ददति। |
|  |  |  |
| गुरुः शिष्यान् कथयति।<br>अयं शिष्यान् कथयति। | मुनी कुट्यां निवसतः।<br>इमौ कुट्यां निवसतः। | मुनयः तपः चरन्ति।<br>इमे तपः चरन्ति। |

| **स्त्रीलिङ्गम्** | | |
|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् |
|  |  |  |
| | | |

| | | |
|---|---|---|
| माता गृहं सम्मार्जयति।<br>इयं गृहं सम्मार्जयति। | मातरौ शिशू लालयतः।<br>इमे शिशू लालयतः। | मातरः जलम् आनयन्ति।<br>इमाः जलम् आनयन्ति। |
|  |  |  |
| रुचिः मातरम् अनुसरति।<br>एषा मातरम् अनुसरति। | नद्यौ गिरिम् उभयतः प्रवहतः।<br>एते गिरिम् उभयतः प्रवहतः। | धेनवः गोष्ठे निवसन्ति।<br>एताः गोष्ठे निवसन्ति। |

| **नपुंसकलिङ्गम्** | | |
|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् |
|  |  |  |
| मधु पुष्पेषु भवति।<br>एतत् पुष्पेषु भवति। | मधुनी पात्रयोः स्तः।<br>एते पात्रयोः स्तः। | मधूनि मधुकोषेषु सन्ति।<br>एतानि मधुकोषेषु सन्ति। |
|  |  |  |
| दुग्धात् दधि परिणमति।<br>दुग्धात् इदं परिणमति। | अक्षिणी विशाले स्तः।<br>इमे विशाले स्तः। | बालकाः अक्षीणि निमीलयन्ति।<br>इमानि अक्षीणि निमीलयन्ति। |

### शब्दार्थाः

सम्मार्जयति = बुहारती है। लालयतः = प्यार करती हैं। अनुसरति = पीछे चल रही है। उभयतः= दोनांे ओर। प्रवहतः = बह रही हैं। गोष्ठे = गोशाला में। मधुकोषेषु = मधुमक्खियों के छत्तों में। परिणमति = रूपान्तरित होता है, परिवर्तित होता है। निमीलयन्ति = मूँदते हैं।

## अभ्यासः

१ उच्चारणं कुरुत-

नद्यौ प्रवहतः स्तः मधुकोषेषु शिशू

दुग्धात् परिणमति अक्षिणी अक्षीणि सम्मार्जयति

२ एक पदेन उत्तरत -

(क)फलं कः ददाति ? (ख) वस्त्राणि के ददति ?

(ग) मुनयः किं चरन्ति ? (घ)रुचिः काम् अनुसरति ?

(ङ)मातरौ कौ लालयतः ? (च)गोष्ठे काः निवसन्ति ?

(छ)का गृहं सम्मार्जयति ? (ज)मधूनि कुत्र सन्ति ?

३ शब्दरूपाणि लिखत -

शब्दःविभक्तिः एकवचनम्द्विवचनम् बहुवचनम्

पितृप्रथमा .......................................................

मातृप्रथमा .......................................................

नेतृप्रथमा .......................................................

४ पाठे प्रयुक्तान् सर्वनामशब्दान् चित्वा लिखत -

यथा- एषा, एते ...................................................

...................................................

...................................................

५ मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -

जलम् अक्षीणि गोष्ठे नद्यौ घनाः दुग्धात्

(क) धेनवः ............ निवसन्ति। (ख) इमाः ............ आनयन्ति।

(ग) गिरिम् उभयतः ............. प्रवहतः।(घ) ............. दधि परिणमति।

(ङ) ................. निमीलयन्ति। (च) आकाशे ................गर्जन्ति।

ध्यातव्यम्-

''संज्ञा शब्दानां स्थाने येषां शब्दानां प्रयोगः भवति, ते सर्वनामशब्दाः भवन्ति।

ध्यातव्यम् -

६ चित्राणि दृष्ट्वा उचित-सर्वनामपदैः रिक्तस्थानानि पूरयत-

..  ............वृक्षः अस्ति।

.  ..............कमलानि सन्ति।

 ...................बालिकाः पठन्ति।

.  .............अजाः तृणं चरन्ति।

 ............पुस्तकानि सन्ति।

.............बसयानम् अस्ति।

7 अधोलिखित-क्रियापदानां वाक्येषु प्रयोगं कुरुत-

वदसि, लालयतः, अनुसरन्ति, ददाति, चरन्ति।

8 उपयुक्त-क्रियापदं चित्वा वाक्यं शुद्धं कुरुत -

(क) सः मातरं नमन्ति। (नमति, नमामि, पश्यसि।)

(ख) अयं छात्रः विद्यालयं गच्छन्ति। (गच्छामि, गच्छति, गच्छतः।)

(ग) अहं प्रतिदिनं पुस्तकं पठति। (पठसि, पठन्ति, पठामि।)

(घ) इयं नदी काश्यां प्रवहसि। (प्रवहन्ति, प्रवहामि, प्रवहति।)

(ङ) त्वं पुस्तकं नयति। (नयसि, नयामि, नयन्ति)

9 संस्कृतभाषायाम् अनुवादं कुरुत - धातु-सङ्केतः

(क) प्रतिदिन माता-पिता को प्रणाम करो। (नम्)

(ख) लोग मधु के साथ औषध भी खाते हैं। (खाद्)

(ग) मुनिजन स्नान के लिए नदी जाते हैं। (गम्)

(घ) स्नान से शरीर स्वच्छ होता है। (भू)

शिक्षण-सङ्केतः

संस्कृतवाक्यानि वक्तुम् अभ्यासं कारयत।

कर्तारः सुलभाः लोके विज्ञातारस्तु दुर्लभाः।

## द्वितीयः पाठः    चित्रपाठः (इदम्, किम्-सर्वनामशब्दरूपाणि)

### पुल्लिङ्गम्



अयं कः ? अयं राष्ट्रपिता मोहनदासकरमचन्द-गान्धी। कथम् अयं राष्ट्रपिता ? अयं वर्तमानभारतराष्ट्रस्य जनकः अस्ति। गान्धिजयन्ती कदा भवति ? गान्धिजयन्ती अक्टूबर-मासस्य द्वितीयदिवसे भवति। कथम् अयं प्रसिद्धः ? अयं सत्याग्रहेण अहिंसान्दोलनेन च परतन्त्रं भारतं स्वतन्त्रम् अकारयत्। अयं अन्यत् किं कार्यम् अकरोत्? अयं देशहिताय स्वजीवनम् अयच्छत्।



अयं कः ? अयं अस्माकं राष्ट्रस्य तृतीयः राष्ट्रपतिः माननीयः डॉ0 जाकिर हुसेनमहाभागः। कथम् अयं तृतीयः राष्ट्रपतिः ? प्रथमः राष्ट्रपतिः डॉ0 राजेन्द्र प्रसादः, द्वितीयः सर्वपल्ली डॉ0 राधाकृष्णन् महाशयः तृतीयः चायम्। अस्य किं वैशिष्ट्यम् आसीत् ? अयं नूतनायाः प्राथमिक-शिक्षापद्धतेः विशेषज्ञः आसीत्।



अयं कः ? अयं डॉ0 भीमरावअम्बेडकरमहाभागः। कथम् अयं प्रसिद्धः ? स्वतन्त्रभारतस्य संविधाननिर्माणे अस्य अपूर्वं महत्त्वपूर्णं च योगदानम् आसीत्। डॉ0 अम्बेडकरः समाजस्य हिताय बहुप्रयत्नम् अकरोत्।

### स्त्रीलिङ्गम्

इयं का ? इयं 'भारतकोकिला' श्रीमतीसरोजिनीनायडूमहाशया। कथम् इयं 'भारतकोकिला' ? इयं विदुषी कवयित्री सुमधुरभाषिणी च आसीत्। इयं राष्ट्रहिताय किं किं प्रशंसनीयं कार्यम् अकरोत् ? इयं स्वतन्त्रतासंग्रामे बारं बारं कारागारम् अगच्छत्। बहूनि कष्टानि चासहत। इयं स्वतन्त्रभारते उत्तरप्रदेशस्य प्रथमं राज्यपालपदम् अभूषयत्।



इयं का ? इयं प्रियदर्शिनी इन्दिरागान्धी। इयं कथं प्रसिद्धा ? इयम् अस्माकं देशस्य प्रधानमन्त्री आसीत्। इयं प्रथमप्रधानमन्त्रिणः जवाहरलालनेहरूमहोदयस्य सुपुत्री आसीत्। अस्याः विवाहः फिरोजगान्धिना सह अभवत्। जवाहरलालनेहरूमहोदयः स्वतन्त्रतान्दोलने बहुधा कारागारम् अगच्छत्। कारागारात् सः इन्दिरायै अनेकानि पत्राणि प्रेषितवान्। एतानि पत्राणि 'पुत्र्याः कृते पितुः पत्राणि' इति नाम्ना पुस्तकरूपेण प्रकाशितानि सन्ति। सर्वे जनाः इमां कुशलप्रशासिकारूपेण श्रद्धया स्मरन्ति।



इयं का ? इयं भारतानुरागिणी परमविदुषी डॉ0 एनीबेसेण्ट महोदया। अस्याः का विशेषता ? इयं जन्मना आङ्ग्लदेशीया, परं भारतीयसंस्कृत्या भारतीयदर्शनेन च प्रभाविता आसीत्। इयं हिन्दू-विश्वविद्यालयस्य निर्माणाय सर्वप्रथमं प्रभूतं धनं विस्तृतं भूखण्डं च अददात्। अस्याः भाषणेषु रचनासु च संस्कृतवाङ्मयस्य संस्कृतभाषायाः च गौरवं महत्त्वं च प्रकाशितम् अस्ति। इयं देशस्य स्वतन्त्रतायै महत्त्वपूर्णं योगदानम् अकरोत्।



## नपुंसकलिङ्गम्

लखनऊनगरम् उत्तरप्रदेशस्य राजधानी अस्ति। इदं प्राचीनं सुरम्यं च नगरम् अस्ति। अत्र बहूनि दर्शनीयानिस्थलानि सन्ति, यथा- रेजीडेंसीस्थलम्, इमामबाड़ाभवनम्, सचिवालयश्च। इदं किम ? इदं रेजीडेंसीस्थलम् अस्ति। इदम् अस्माकं देशभक्तानाम् आत्मत्यागं स्मारयति। आङ्ग्लशासनकाले वैदेशिकाः आन्दोलनेन विचलन्ति स्म। प्रथमे स्वतन्त्रतासंग्रामे 1857 तमे वर्षे भारतीयाः वीराः आङ्ग्लशासनस्य यदा विरोधम् अकुर्वन् तदा देश-भक्ताः अत्रापि आङ्ग्लान् आक्रान्तवन्तः। अस्मिन् युद्धे राष्ट्रभक्तैः स्वरक्तं प्रवाहितम्। तेषां त्यागेनैव स्वतन्त्रतायाम् एकं सोपानं निर्मितम्।





इदम् इमामबाड़ा-भवनम् अतिमनोहरम् अस्ति। इदम् अवधशासकानां स्मारकम् अस्ति। अस्य भवनस्य छदिःअतिविस्तृता अस्ति। इयं स्तम्भैः विनापि बहुकौशलेन निर्मिता अस्ति। अस्मिन् एकं विचित्रं सोपानमण्डलम् अस्ति। विचित्रे सोपानमण्डले नवागन्तुकाः बहुधा मार्गं विस्मरन्ति। अत एव जनाः इदं भवनं 'भूल भुलैया' इति वदन्ति। इदं भवनम् अवधशासकानां वास्तुकलानुरागं प्रकटयति।

इदं सचिवालयभवनम् अस्ति। अस्मिन् भवने विधानसभायाः विधानपरिषदश्च अधिवेशनानि भवन्ति। अस्मिन् एव भवने स्थित्वा राज्यस्य मन्त्रिणः सचिवाः अन्ये चाधिकारिणः राजकार्यं सञ्चालयन्ति। सचिवालये एवउत्तरप्रदेशशासनस्य मुख्यः कार्यालयः अस्ति। अस्मात् भवनात् नातिदूरे सुविशालं राजभवनम् अस्ति।



शब्दार्थाः

सत्याग्रहेण = सत्य के लिए मन, वचन और कर्म से दबाव डालना। अन्यत् = और।अयच्छत् = दिया।वैशिष्ट्यम् = विशेषता।विशेषज्ञः= विशेष जानकार। कवयित्री = कविता करने वाली। असहत = सहा। अभूषयत् = शोभित किया। प्रेषितवान् = भेजा। भारतानुरागिणी = भारतदेश से प्रेम रखने वाली। प्रभूतम् = बहुत। सुरम्यम् = अतिसुन्दर। आक्रान्तवन्तः = सताये, डराये। स्मारयति = याद दिलाती है। विचलन्ति स्म = विचलित होते थे। छदिः = छत। स्तम्भैः विनापि = खम्भों के बिना भी। अधिवेशनानि = बैठकें।

**अभ्यासः**

१ उच्चारणं कुरुत-

राष्ट्रपिता अहिंसान्दोलनेन त्यागेनैव

नूतनायाः वैशिष्ट्यम् शिक्षापद्धतेः

कवयित्री संस्कृतवाङ्मयस्य आक्रान्तवन्तः

२ एकपदेन उत्तरत-

(क) ‘राष्ट्रपिता’ नाम्ना कः प्रसिद्धः ?

(ख) भारतस्य तृतीयः राष्ट्रपतिः कः ?

(ग) उत्तर-प्रदेशस्य प्रथमं राज्यपालपदं का अभूषयत् ?

(घ) इन्दिरागान्धी कस्य सुपुत्री ?

(ङ) उत्तरप्रदेशस्य राजधानी का ?

३ एकवाक्येन उत्तरत-

(क) गान्धिजयन्ती कदा भवति ?

(ख) डॉ0 भीमरावअम्बेडकरस्य संविधाननिर्माणे कीदृशं योगदानमासीत् ?

(ग) श्रीमती सरोजिनीनायडूः किं पदमभूषयत् ?

(घ) जनाः इन्दिरां केन रूपेण स्मरन्ति ?

(ङ) डॉ0 एनीबेसेण्टमहोदया हिन्दू-विश्वविद्यालयाय किम् अददात् ?

(च) रेजीडेंसीस्थले भारतभक्तैः किं प्रवाहितम् ?

**ध्यातव्यम् -**

“इदम्” शब्दस्य पुंल्लिङ्.गे ‘अयम्’ इति रूपं भवति। स्त्रीलिङ्गे ‘इयम्’इति रूपं भवति। नपुंसकलिङ्गे ‘इदम्’ इति रूपं भवति। पाठे ‘राष्ट्रपिता’ इति पुंल्लिङ्गविशेष्येण सह ‘अयम’् इति रूपं प्रयुक्तम्। एवमेव ‘भारतकोकिला’ इति स्त्रीलिङ्गविशेष्येण सह ‘इयम्’ इति प्रयुक्तम्। नगरम् इति नपुंसकलिङ्गेन सह ‘इदम्’ इति प्रयुक्तम्। अनेन अयं नियमः अभवत् यत् सर्वनामशब्दाः विशेषणरूपे प्रयुक्ताः भवन्ति। विशेष्ये यत् लिङ्गम्, या विभक्तिः, यत् वचनं च भवति, विशेषणे अपि तत् लिङ्गम्, सा विभक्तिः, तत् वचनं च भवति। सर्वनामशब्दाः- इदम्, तत्, किम्, यत्, अदस्, एतत् चेत्यादयः सन्ति, यथा-

(क) अयं राष्ट्रपिता।

(ख) इयं भारतकोकिला।

(ग) इदं प्राचीनं नगरम्।

4.सन्धि-विच्छेदं कुरुत -

पदम् सन्धिविच्छेदः

यथा-अहिंसान्दोलनेन अहिंसा+आन्दोलनेन

अत्रापि .......................................

चायम् .......................................

नातिदूरे .......................................

५.मञ्जूषातः-सर्वनाम-पदानि चित्वा चित्रानुसारं वाक्यानि रचयत -

अयम् इयम् इदम् इमाः इमे

  

............................. .................................... ................................

  

....................... ................................... ..........................

6 विशेष्य-शब्दस्य उचित-रूपेण रिक्त-स्थानानि पूरयत -

(क) इदं ............. मधुरमस्ति। (फल)

(ख) अयं .............. सुन्दरः अस्ति। (बालक)

(ग) भारतस्य तृतीयः राष्ट्रपतिः ........... आसीत्। (जाकिरहुसेन)

(घ) इदं सुन्दरं ................. वर्तते। (पुष्प)

(ङ) इमाः ............ लिखन्ति। (बालिका)

7 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) अयं देशहिताय स्वजीवनम् अयच्छत्।

(ख) अयं शिक्षापद्धतेः विशेषज्ञः आसीत्।

(ग) संविधाननिर्माणे अस्य अपूर्वं योगदानमस्ति।

(घ) इयं प्रथमराज्यपालपदम् अभूषयत्।

8 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) महात्मा गान्धी ने देश के लिए कार्य किया।

(ख) यहाँ बहुत दर्शनीय स्थल हैं।

(ग) इस स्मारक को देखने लोग आते हैं।

(घ) रेजीडेंसी-स्थल पर देशभक्तों को याद करते हैं।

(ङ) राजभवन में राज्यपाल रहते हैं।

शिक्षण-सङ्केतः

(क) कक्षायां छात्रैः अनुच्छेदवाचनं कारयत।

(ख) तत्-किम्-एतत्-शब्दरूपाणां लेखनं वाचनं च कारयत।

अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति।

# तृतीयः पाठः अभिलाषः

दयामय! देव! दीनेषु दयादृष्टिः सदा देया ।

प्रतिज्ञा दीनरक्षाया दयालो! जातु नो हेया ।।

मनुष्या मानवा भूत्वा इदानीं दानवा जाताः ।

तदेषा मूढता देशाद् द्रुतं दूरे त्वया नेया ।।

त्वदुपदेशामृतं त्यक्त्वा विपन्नो हन्त लोकोऽयम् ।

तदुद्धाराय चैतेषां प्रभो! गीता पुनर्गेया ।।

किमधिकं ब्रूमहे भगवन्! विनीतप्रार्थनैकेयम् ।

यदेते बालकाः स्वीयाः प्रभो नो विस्मृतिं नेयाः।।

शब्दार्थाः

दयादृष्टिः = कृपापूर्ण भाव। देया = देना चाहिए। जातु = कदाचित् (कभी)। नो = नहीं। हेया = छोडें। जाताः = हो गये हैं। इदानीं = इस समय। मूढता = अज्ञानता। द्रुतम् = शीघ्र। नेया = ले जानी चाहिए। त्वदुपदेशामृतम् = तुम्हारे उपदेशरूपी अमृत को। त्यक्त्वा = छोड़कर। विपन्नः = दु:खी। हन्त = खेद है। ब्रूमहे = कहें। गेया = गायी जानी चाहिए। स्वीयाः = अपने। विनीतप्रार्थनैकेयम् = (विनीत$प्रार्थना$ एका$इयम्) विनम्र प्रार्थना एक यह।

अभ्यासः

1 उच्चारणं कुरुत -

दीनरक्षायाः त्यक्त्वा लोकोऽयम्

पुनर्गेया विनीतप्रार्थनैकेयम् तदुद्धाराय

2 एकपदेन उत्तरत -

(क) दीनेषु का देया ? (ख) कस्याः प्रतिज्ञा न हेया ?

(ग) मूढता कस्मात् दूरे नेया ?(घ) मानवानाम् उद्धाराय पुनः का गेया ?

3 पाठात् उचितपदानि चित्वा वाक्यं पूरयत -

(क) दीनरक्षायाः ................ नो हेया।

(ख) मूढता देशात् ............ नेया।

(ग) उद्धाराय ............... पुनः गेया।

(घ) यदेते बालकाः ................... नेयाः।

4 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -

(क)दीनेषु दयादृष्टिः सदा देया।

(ख)मूढता देशात् दूरे त्वया नेया।

(ग)गीता पुनर्गेया।

5 हिन्दीभाषायाम् अनुवादं कुरुत -

(क)दीनेषु सदा दयादृष्टिः देया।

(ख)सदा शुद्धं जलं पेयम्।

(ग) मानवानां मूढता देशात् दूरे नेया।

(घ)भगवन्! वयम् अधिकं किं ब्रूमहे।

6 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) मेरी यह नम्र प्रार्थना है।

(ख)देश से गरीबी दूर करें।

(ग)कल्याण के लिए शिक्षा दें।

(घ)स्वास्थ्य के लिए प्रदूषण दूर करें।

7 उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं 'न' इति लिखत -

(क) दीनेषु दयादृष्टिः देया। ......................

(ख) दीनरक्षायाः प्रतिज्ञा हेया। ......................

(ग) प्रतिदिनं दन्तधावनं कुर्यात्।......................

(घ) सुन्दरं लेखं न लिखेत्। .....................

ध्यातव्यम् - धातोः योग्यार्थबोधनाय (चाहिए) 'यत्' प्रत्ययः भवति, यथा-दातुं योग्यम् = देयम् (देना चाहिए)। अस्य त्रिषु लिङ्गेषु रूपाणि भवन्ति। यथा- दा+यत् =देयम् (नपुं0), देया (स्त्री0), देयः (पु0) (देना चाहिए)।

**धातुः + प्रत्ययः -रूपम्**

दा + यत् = देयम्

नी + यत् = नेयम्

हा + यत् = हेयम्

गै + यत् = गेयम्

शिक्षण-सङ्केतः

1. पद्यानां सस्वरवाचनं कारयत।

2. पाठे वर्णितानाम् अभिलाषाणां छात्रैः अभ्यासं कारयत।

<table>
<tr><td colspan="3">मत्कुण-पिपीलिका-संवादः</td></tr>
<tr><td colspan="2">मत्कुणः उवाच-</td><td rowspan="3"></td></tr>
<tr><td>कथय भगिनि! किं तव अभिधानम् ?<br>कथय कुत्र तव वास-स्थानम् ?<br>कथय कुतः सम्प्रति आगच्छसि ?<br>त्वरितं कुत्र किमर्थं गच्छसि ?<br>अङ्गं तव अतिशय-सुकुमारम्<br>वहसि तथापि अहो! गुरु-भारम्।<br>धावन्ती गच्छसि अविरामम्<br>कथय कदा कुरुषे विश्रामम् ?</td><td>कृत्वा स्वयं श्रमं भोक्तव्यम्<br>इति मे अस्ति निजं मन्तव्यम्।<br>अतः श्रमे सततं संलग्ना<br>नैव कदापि गतिर्मे भग्ना ।।<br>त्वं सदैव पर-तल्पे लीनः<br>पीत्वा पर-रुधिरं खलु पीनः।<br>किन्तु इदं न उचित-कर्तव्यम्<br>न इदं वेद-शास्त्र-मन्तव्यम् ।।</td></tr>
<tr><td colspan="2">पिपीलिका उवाच-</td></tr>
</table>

<table>
<tr><td>मम पिपीलिका इति अभिधानम्<br>विवरे विद्धि मदीयं स्थानम्।<br>दूरे एव पुनर्मम गमनम्।।</td><td>अतः श्रमं कृत्वा भोक्तव्यम्<br>इति भवतापि मतं मन्तव्यम्।<br>जहीहि, देहि पन्थानम्<br>दूरे मम गन्तव्य-स्थानम् ।।</td><td></td></tr>
<tr><td colspan="3">शब्दार्थाः<br>मत्कुणः = खटमल। पिपीलिका = चींटी। अभिधानम् = नाम। विवरे = बिल में । विद्धि = जानो। पर-तल्पे = दूसरे के बिस्तर पर। जहीहि = छोड़ो।</td></tr>
</table>

विशेषः- मत्कुण-पिपीलिकयोः मध्ये सञ्जातस्य उपर्युक्तरोचक-संवादस्य स्वाध्यायं कारयत तथा पिपीलिकायाः श्रमशीलतया आत्मनिर्भरतया च प्राप्तसंदेशं छात्रान् श्रावयत।

क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।

# चतुर्थः पाठः अतिलोभो न कर्त्तव्यः

(क्त-प्रत्ययः लङ्लकारश्च)

एकस्मिन् देशे कश्चिद् राजा आसीत्। तस्य नाम मायादासः। अतिलुब्धः सः दरिद्रः इव जीवनं नयति स्म। एकदा कोऽपि मुनिः मायादासस्य प्रासादम् आगच्छत्। नृपतिः तं मुनिं सत्कारेणातोषयत्। नृपतिना सत्कृतः सन्तुष्टः मुनिः अवदत् - 'नृपते! स्वस्त्यस्तु ते। अभीष्टं वरं वरय' इति। मुनिनैवम् उक्तः सः भूपतिः लोभेन प्रेरितः वरम् अयाचत - 'मया स्पृश्यमानाः पदार्थाः सौवर्णाः भवन्तु' इति। 'तथास्तु' इत्युक्त्वा मुनिः अन्तर्हितः।



मुनेः वरं लब्ध्वा गृहं प्रविष्टः मायादासः तत्र स्थितानि वस्तूनि अस्पृशत्। तेन स्पृष्टानि वस्तूनि सद्यः एव सौवर्णानि जातानि। तद् दृष्ट्वा सः नितरामतुष्यत्। ततः तस्य महती पिपासा जाता। सः जलं पातुम् उद्यतः अभवत्। तेन स्पृष्टं जलमपि सुवर्णपिण्डमभवत्। साधूक्तं न मृषा भवति।

तस्मिन् अवसरे राजकुमारी कुसुममञ्जरीमादाय तत्रागता। "पितः! अतीव सुन्दराणीमानि कुसुमानि" इति चावदत्। नृपतिः तां मञ्जरीं करेणास्पृशत्। तेन स्पृष्टा मञ्जरी सुवर्णमयी जाता। तद् दृष्ट्वा कुमारी दुःखिता अभवत्। सुतंा समाश्वासयितंु प्रवृत्तः सः मायादासः ताम् अङ्के उपवेशयति स्म। हन्त! कुमारी सुवर्णप्रतिमा सञ्जाता। मायादासः शोकेनोच्चैः व्यलपत्।

तदा भाग्यात् स एव मुनिः नृपतेः पुरतः प्रत्यक्षम् अभवत्। मायादासः तं प्रणम्य- 'महर्षे! कृपया दत्तं वरं निवर्तयतु। इयं कुमारी मम जीवितं स्यात्' इति न्यवेदयत्।

महर्षिः अवदत् - 'मायादास! त्वया सुवर्णस्य महत्त्वं गणितम्। वस्तुतः तत् तुच्छम्। उद्यानात् जलमानय। तेन जलेन सिक्तानि वस्तूनि पूर्वामवस्थां प्राप्स्यन्ति।' इत्युक्त्वा मुनिः तत्रैवान्तर्हितः।

मायादासः उद्यानात् जलमानयत्। तेन जलेन सिक्तानि सौवर्णानि वस्तूनि स्वां प्रकृतिं प्राप्तानि। राजकुमार्यपि मन्दं हसन्ती पितुः मानसमतोषयत्। सत्यम् उक्तम्-

अतिलोभो न कर्त्तव्यः, स तु दुःखस्य कारणम्।

### शब्दार्थाः

कश्चिद् = कोई। प्रासादम् = राजमहल। अतोषयत् = सन्तुष्ट किया। सत्कृतः = सत्कार किया गया। अभीष्टम् = मनोवाञ्िछत, मनचाहा। वरय = वरदान माँगो। स्पृश्यमानाः =

छुये गये। भवन्तु = हो जाएँ। तथास्तु = ऐसा ही हो। अन्तर्हितः = अन्तर्धान हो गया। प्रविष्टः = प्रवेश किया हुआ। अस्पृशत् = स्पर्श किया। स्पृष्टानि = छुये हुए। सद्यः = तुरन्त। जातानि = हो गया। नितराम् =पूरी तरह से। अतुष्यत् = सन्तुष्ट हो गया। महती = बहुत बड़ी। पिपासा = पीने की इच्छा। जाता = उत्पन्न हुई। पातुम् = पीने के लिए। उद्यतः = तैयार हुआ। स्पृष्टम् = छुआ हुआ या स्पर्श किया गया। सुवर्णपिण्डम् = सोने का गोला। उक्तम् = कहा गया। मृषा = झूठ। आगता = आयी। समाश्वासयितुम् = आश्वस्त करने के लिए, भरोसा दिलाने के लिए। प्रवृत्तः = लग गया। अङ्के उपवेशयति स्म = गोद में बैठाया। हन्त = अत्यन्त दुःख है। प्रतिमा = मूर्ति। सञ्जाता = हो गयी। व्यलपत् = विलाप किया। निवर्तयतु = लौटा लें, वापस ले लें।

अभ्यासः

1 उच्चारणं कुरुत -

कश्चित् स्वस्त्यस्तु मुनिनैवम् इत्युक्त्वा

साधूक्तम् समाश्वासयितुम् शोकेनोच्चैः तत्रैवान्तर्हितः

2 एकवाक्येन उत्तरत -

(क)मायादासः कः आसीत् ?

(ख) मायादासः किं अयाचत ?

(ग)‘अभीष्टं वरं वरय’ इति कः अवदत् ?

(घ)‘हन्त! कुमारी सुवर्णप्रतिमा सञ्जाता’ इदं वाक्यं कः अवदत् ?

(ङ)किं दुःखस्य कारणम् ?

ध्यातव्यम्

(क) धातोः भूतकालस्य अर्थे क्तप्रत्ययस्य प्रयोगः भवति यथा- कृ+क्त =कृतम् (किया गया)। पठ्+क्त = पठितम् (पढ़ा गया)। अस्य प्रयोगः क्रियारूपेण विशेषणरूपेण च भवति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

(ख) धातोः तव्यत् प्रत्ययस्य प्रयोगः योग्यार्थबोधनाय (चाहिए) भवति, यथा - कृ+तव्यत् = कर्त्तव्यम्। मन+तव्यत् = मन्तव्यम्। अस्यापि प्रयोगः क्रियारूपेण विशेषणरूपेण च भवति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

3 उदाहरणानुसारं सन्धि-विच्छेदं कुरुत-

सन्धिपदम्सन्धिविच्छेदः पूर्वपदस्य अन्तिमपदस्य द्वयोः योगेन अन्तिमः वर्णः पूर्ववर्णः सन्धियुक्तवर्णः साधूक्तम् साधु+उक्तम् उ उ ऊ

सुन्दराणीमानि.............................................................................. ....................................

चावदत्.............................................................................. ....................................

शोकेनोच्चैः.............................................................................. ....................................

सत्कारेणातोषयत् .............................................................................. ....................................

4 हिन्दीभाषायाम् अनुवादं कुरुत-

(क) मया स्पृश्यमानाः पदार्थाः सौवर्णाः भवन्तु।

(ख) तेन स्पृष्टं जलमपि सुवर्णपिण्डमभवत्।

(ग) ''पितः! अतीव सुन्दराणीमानि कुसुमानि'' इति चावदत्।।

(घ) मञ्जरी सुवर्णमयी जाता।

(ङ) मायादासः शोकेन उच्चैः व्यलपत्।

5 संस्कृतभाषायाम् अनुवादं कुरुत-

(क) उसका नाम केशव था।

(ख) उसके पिता का नाम रामदास था।

(ग) उसकी माता का नाम मायादेवी था।

(घ) एक बार वह बाजार गया।

(ङ) वहाँ वह अपने मित्र से मिला।

6 मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत-

जाता जातानि अयाचत आनयत् वरय

(क) मुनिः अवदत् अभीष्टं वरम् ................।

(ख) सः भूपतिः वरम् ..................।

(ग) तेन स्पृष्टानि वस्तूनि सद्यः एव सौवर्णानि .............।

(घ) तेन स्पृष्टा मञ्जरी सुवर्णमयी ..........।

(ङ) मायादासः उद्यानात् जलम् ....................।

7 अस्य पाठस्य कथां स्वशब्देषु हिन्दीभाषायां लिखत।

8 चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत-



शिक्षकः छात्रः प्रश्नम्

पृच्छति लिखति अभ्यासपुस्तिकायाम्

श्यामपट्टे छात्राः पृच्छन्ति लिखन्ति

.................................................................

.....................................................................

.................................................................

.....................................................................

.................................................................

.....................................................................

.................................................................

.....................................................................

एतदपि जानीत-

संस्कृत-दिवस रक्षाबन्धन के दिन मनाया जाता है।

शिक्षण-सङ्केतः

लोभे आधारिताः अन्याः कथाः बालकान् श्रावयत।

**केतकीगन्धमाघ्रातुं स्वयमायान्ति षट्पदाः।**

## पञ्चमः पाठः वयं स्वाधीनाः

लोकेऽधुना वयं स्वाधीनाः।

तिमिरो गतः प्रकाशो जातः।।

क्रीडार्थं दिवसोऽप्यायातः।

नव्यं युगं नवीनो देशो वार्तागताखिला प्राचीना।।

लोकेऽधुना वयं स्वाधीनाः ।। 1 ।।

पद्मश्रीर्विहसति पुलिनेषु।

हासः खेलति जनाधरेषु।

धनान्विताः सर्वे दृश्येरन् शिष्येरन् देशे न हि दीनाः।।

लोकेऽधुना वयं स्वाधीनाः ।। 2 ।।

स्त्रीपुंसयोः समोऽस्त्यधिकारः।

स्वप्नो जातोऽयं साकारः।

संविधाननवपथानुकूला शासननीतिर्नवा नवीना।।

लोकेऽधुना वयं स्वाधीनाः ।। 3 ।।

शान्तिर्मिलति सुरक्षान्यायः।

सहकारः सहचरः सहायः।

उच्चाशयता पुना राजते मनसि भावना कापि न हीना ।।

लोकेऽधुना वयं स्वाधीनाः ।। 4 ।।

### शब्दार्थाः

अधुना = इस समय। तिमिरः = अन्धकार। दिवसोऽप्यायातः = (दिवसः+अपि+ आयातः) दिवस भी आ गया। नव्यम् = नया। वार्तागताखिला प्राचीना = (वार्ता+गता+ अखिला) पुरानी बात समाप्त हो गयी, पुरानी परिस्थितियां अब नहीं रहीं। पद्मश्रीः = कमलों की शोभा। पुलिनेषु = तटों पर। अधरेषु = ओठों पर। धनान्विताः = धन से युक्त, धनवान्। दृश्येरन् = दिखलायी दें। शिष्येरन् = शेष रहें। समोऽस्त्यधिकारः =

(समः+अस्ति+अधिकारः) समान अधिकार है। सहकारः = सहयोग। सहचरः = साथी। उच्चाशयता = उच्च विचार।

अभ्यासः

1 उच्चारणं कुरुत -

क्रीडार्थम् दिवसोऽप्यायातः उच्चाशयतास्वतन्त्रतायाः

पद्मश्रीर्विहसति धनान्विताः शिष्येरन् समोऽस्त्यधिकारः

2 एकवाक्येन उत्तरत-

(क) अधुना लोके वयं कीदृशाः स्मः ?

(ख) अखिला प्राचीना वार्ता किम् अभवत् ?

(ग) पुलिनेषु का विहसति ?

(घ) अस्माकं कः स्वप्नः साकारः जातः ?

(ङ) इदानीं शासननीतिः कीदृशी अस्ति ?

3 सन्धि-विच्छेदं कुरुत -

पदम् सन्धि-विच्छेदः

जनाधरेषु ...................................।

पथानुकूला ...................................।

स्वाधीनाः ...................................।

4 समासविग्रहं कृत्वा समासनाम लिखत-

पदम् समासविग्रहः समासनाम

शासननीतिः शासनस्य नीतिः तत्पुरुषः

भोजनालयः .......................... ...................

पाठशाला .......................... ...................

वटवृक्षः .......................... ...................

5 उपसर्गाणां क्रियाणां च योगं कृत्वा पदनिर्माणं कुरुत-

यथा- अव + अकिरत्= अवाकिरत्

प्र + अचलत्= ............................

आ + हसति= ............................

सम् + अकरोत्= ............................

परा + अवर्तत= ............................

उप +अगच्छत्= ............................

वि + हसति= ............................

6 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) आज हमारा देश स्वतन्त्र है।

(ख) अन्धकार समाप्त हो गया है।

(ग) जल में कमल खिले हुए हैं।

(घ) समाज में स्त्री-पुरुषों को समान अधिकार प्राप्त है।

7 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) तिमिरो गतः प्रकाशो जातः।

(ख) हासः खेलति जनाधरेषु।

(ग) स्वप्नो जातोऽयं साकारः।

(घ) संविधाननवपथानुकूला।

(ङ) मनसि भावना कापि न हीना।

8 श्लोकांशान् योजयत-

'क' 'ख'

पद्मश्रीर्विहसति पुलिनेषु सहकारः सहचरः सहायः।

स्त्रीपुंसयोः समोऽस्त्यधिकारः हासः खेलति जनाधरेषु।

शान्तिर्मिलति सुरक्षान्यायः स्वप्नो जातोऽयं साकारः।

संविधाननवपथानुकूला मनसि भावना कापि न हीना।

उच्चाशयता पुना राजते शासननीतिर्नवा नवीना।

शिक्षण-सङ्केतः

1. पाठस्य कवितायाः सामूहिकवाचनं कारयत।

2. कवितायाः भावं हिन्दीभाषायां लेखनस्य अभ्यासं कारयत।

पपपाठ

**सम्भावितस्य चाकीर्तिः मरणादतिरिच्यते।**

## षष्ठः पाठः ईद-महोत्सवः

(अद्य ईद-महोत्सवः अस्ति। ह्यः चन्द्र-दर्शनम् अभवत्। अस्माकं त्रिंशद् दिनात्मकं व्रतं सुखेन समाप्तिम् अगच्छत्। इदानीं सर्वे व्रतिनः परमेश्वरस्य कृपया प्रसन्नाः। गृहे-गृहे बालकाः-बालिकाश्च इतस्ततः मोदेन भ्रमन्ति, क्रीडन्ति, संलपन्ति च।)

अहमदः वत्स नाजिर ! त्वम् किं करोषि? प्रातः कालादेव न जाने त्वं कस्मिन् कार्ये संलग्नः असि। शीघं्र सज्जो भव।

नाजिरः तात ! अहं तु स्वकीयानि वस्त्राणि ह्य एव अक्षालयम्। अहम् ईदगाहं प्रति गमनाय उद्यतः अस्मि, किन्तु नसीमा इदानीमपि नैव सज्जीभूता।

नसीमाः तात ! किमहं कुर्याम्, मम पूज्या माता मह्यम् नूतनानि वस्त्राणि न ददाति। सा कथयति - ” अहम् इदानीं पक्वान्नानि साधयामि, वस्त्राणि दातुं नैव समर्था ” इति। तात ! अहम् अपि त्वया सह ईदगाहं गमिष्यामि।



अहमदः नसीमे ! त्वम् इहागच्छ। अहं तुभ्यं नवीनानि वस्त्राणि ददामि। सत्वरं सज्जीभव, अन्यथा ईदगाहे उपवेशनाय स्थानं न प्राप्स्यामः।

नसीमाः तात ! अहमपि एषा सज्जीभूता।

अहमदः चलत, चलत, वत्साः ! अधुना वयं सर्वे ईदगाहं गच्छामः।

एवं सर्वे सुन्दराणि नूतनानि परिधानानि परिधाय ईदगाहं गच्छन्ति। तत्र सर्वे एकस्यां पङ्क्तौ सम्मिलिताः भवन्ति। ततः ईदप्रार्थना सम्पन्ना भवति। प्रार्थनानन्तरं सर्वे परस्परम् आलिङ्गन्ति। बालकाः बालिकाश्च तत्र क्रीडनकानि अन्यानि च वस्तूनि क्रीणन्ति। सर्वे स्नेहेन संलपन्तः स्वगृहान् गच्छन्ति। गृहागतानि मित्राणि मिष्टान्नैः सत्कुर्वन्ति।

शब्दार्थाः

ह्यः = कल (बीता हुआ)। त्रिंशद् दिनात्मकम् = तीस दिनों का। व्रतिनः = व्रत (रोजा) करने वाले। इतस्ततः = इधर-उधर। मोदेन = प्रसन्नता से। संलपन्ति = आपस में बात करते हैं। सज्जो भव = तैयार हो जाओ। अक्षालयम् = धोया। तात = पिता। साधयामि = सिद्ध कर रही हूँ, बना रही हूँ। सत्वरम् = शीघ्र। उपवेशनाय = बैठने के लिए। परिधानम् = पहनावा। क्रीडनकानि = खिलौने। सत्कुर्वन्ति = सत्कार करते हैं। परिधाय = पहनकर। आलिङ्गन्ति = गले मिलते हैं।

अभ्यासः

1 उच्चारणं कुरुत -

महोत्सवः दिनात्मकम् क्रीणन्ति पक्वान्नानि

प्राप्स्यामः उपवेशनाय क्रीडनकानि मिष्टान्नैः

2 एकपदेन उत्तरत -

(क) पाठे कः महोत्सवः वर्णितः ?

(ख) ईदगाहे जनाः किं कुर्वन्ति ?

(ग) जनाः नूतनानि वस्त्राणि परिधाय कुत्र गच्छन्ति ?

(घ) जनाः गृहागतानि मित्राणि कैः सत्कुर्वन्ति ?

3 कः/का उक्तवान्/उक्तवती इति लिखत -

(क) वत्स नाजिर ! त्वं किं करोषि ?

(ख) अहम् ईदगाहं प्रति गमनाय उद्यतः अस्मि।

(ग) अहं तुभ्यं नवीनानि वस्त्राणि ददामि।

(घ) तात ! अहमपि एषा सज्जीभूता।

4 मञ्जूषातः चतुर्थीविभक्तियुक्तशब्दैः स्वकल्पनां कृत्वा वाक्यानि रचयत -

मह्यम् तुभ्यम् बालकाय रहमानाय अनुजाय

...........................................................................।

...........................................................................।

...........................................................................।

..........................................................................।

..........................................................................।

5 निम्नलिखितपदेषु सन्धि-विच्छेदं कुरुत -

पदम् सन्धि-विच्छेदः

(क) महोत्सवः ..................................।

(ख) बालिकाश्च ..................................।

(ग) पक्वान्नानि ..................................।

(घ) गृहागतानि ..................................।

ध्यातव्यम्-

‘दा’धातोः (देने के अर्थ में) योगे चतुर्थी विभक्तिः भवति, यथा-

(क) माता पुत्राय वस्त्राणि ददाति।

(ख) अध्यापकः छात्राय पुरस्कारं ददाति।

..................................................... .............................................................

6 चक्र्र-मध्ये क्रियापदानि सन्ति, तानि प्रयुज्य वाक्यानि पूरयत-




..................................................... .............................................................

.................................................... ..............................................................

.................................................... ..............................................................

7 'भू' धातोः लोट्लकारे रूपाणि लिखित्वा अभ्यासं कुरुत -

एकवचनम् द्विवचनम् बहुवचनम्

प्रथमपुरुषः ......... .......... ...........

मध्यमपुरुषः ......... .......... ...........

उत्तमपुरुषः ......... .......... ...........

8 पाठस्य आधारे रिक्तस्थानानि पूरयत -

(क)अद्य ................ अस्ति।

(ख)त्वं कस्मिन् कार्ये संलग्नः ...............।

(ग)................ तुभ्यं नवीनानि वस्त्राणि ददामि।

(घ)तात ! अहमपि एषा .................।

(ङ)अधुना वयं सर्वे .............. गच्छामः।

9 संस्कृतभाषायाम् अनुवादं कुरुत -

(क)प्रार्थना के बाद सभी कक्षा में जाते हैं।

(ख)कल मैंने अपने वस्त्रों को धोया।

(ग)माता मुझे नया वस्त्र देती है।

(घ)तुम यहाँ आओ।

शिक्षण-सङ्केतः

1.अन्यपर्वणां विषये लघुसमूहेषु चर्चां कारयत।

कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः।

# सप्तमः पाठः प्रहेलिकाः

दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः।

गुणस्यूतिः समृद्धोऽपि परपादेन गच्छति ।। 1 ।।

शोभितोऽस्मि शिखण्डेन दीर्घैः पक्षैरलङ्कृतः।

राष्ट्रियो विहगश्चास्मि, नृत्यं पश्यन्ति मे जनाः।। 2 ।।

पठितो नास्म्यहं किञ्िचत् तथापि साक्षरोऽस्म्यहम्।

पादैर्विनैव गच्छामि कथयामि विना मुखम् ।। 3 ।।

क्वचित् प्रस्तरतुल्योऽस्मि क्वचिच्च तरलं पुनः।

क्वचिद्वायुसमं सूक्ष्मं, मां पश्यन्ति सदा जनाः ।। 4 ।।

रेफादौ मकारोऽन्ते वाल्मीकिः यस्य गायकः।

सर्वश्रेष्ठं यस्य राज्यं वद कोऽसौ जनप्रियः ।। 5 ।।

[ख्जलम्, पत्रम्, रामः, उपानत्(ह्), मयूरः,]

अभ्यासः

1 उच्चारणं कुरुत-

दन्तैर्हीनः पक्षैरलङ्कृतः क्वचिद्वायुसमम्

साक्षरोऽस्म्यहम्पादैर्विनैव क्वचिच्च




दन्तैः हीनः = दाँतो से रहित (बिना दाँत के)। शिलाभक्षी = पत्थर खाने वाला। निर्जीवः = बेजान। गुणस्यूतिः = सूत (रस्सी) से सिला। समृद्धोऽपि = धनवान होने पर भी। परपादेन = दूसरे के पैर से। शिखण्डेन = पंख (मयूर पिच्छ) से। विहगश्चास्मि = (विहगः+च+अस्मि) और पक्षी हूँ। पादैर्विनैव = (पादैः+विना+एव) पैरों के बिना ही। साक्षरोऽस्म्यहम् = (साक्षरः+अस्मि+अहम्) मैं साक्षर हूँ, अक्षर सहित। प्रस्तर-तुल्यम् = पत्थर की तरह (कठोर)। रेफादौ = प्रारम्भ में रेफ (र)।उपानह् = जूता (इसका रूप 'उपानत्-उपानहौ-उपानहः' -जैसा चलता है।)

(क) दन्तैः हीनः शिलाभक्षी कः अस्ति ?

(ख) पादैः विना कः गच्छति ?

(ग) राष्ट्रियः विहगः कः अस्ति ?

(घ) कस्य राज्यं सर्वश्रेष्ठम् ?

(ङ) पाठे जलस्य कति रूपाणि वर्णितानि ?

3 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-

न विना सदा पुनः तथापि च

(क) छात्राः ..........................शिक्षकं नमन्ति।

(ख) असत्यवचनं ....................कथनीयम्।

(ग) प्रतिदिनं दन्तधावनं स्नानं.................कुर्यात्।

(घ) जलं ....................जीवनं न सम्भवति।

(ङ) स्वपाठं ................पठ।

4 पाठे प्रयुक्तानि लट्लकारस्य क्रियापदानि लिखत-

यथा- गच्छति, अस्मि ................

5 सन्धि-विच्छेदं कुरुत -

पदम् सन्धि-विच्छेदः

समृद्धोऽपि ....................

शोभितोऽस्मि ....................

मकारोऽन्ते .....................

क्वचिच्च ....................

6 उपयुक्तशब्देन वाक्यं पूरयत-

(क) मयूराः ......................................। ( नृत्यति, नृत्यन्ति।)

(ख) जनाः ..................................... पिबन्ति। (जलम्, फलम्।)

(ग) जनाः चित्राणि ........................ । (पश्यन्ति, पश्यति।)

7प्रहेलिकानां हिन्दीभाषायाम् अर्थं लिखत।

8रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -

(क) उपानत् परपादेन गच्छति।

(ख) मयूरस्य नृत्यं जनाः पश्यन्ति।

(ग) पत्रं पादेन विना गच्छति।

(घ) हिमः जलस्य एव रूपम् अस्ति।

9चित्रं दृष्ट्वा मञ्जूषातः पदानि च चित्वा वाक्यानि रचयत -



पश्यन्ति, जनाः, बालकाः, देविका, केशवः, खेलन्ति, खगाः, पश्यति

पुष्पाणि, चित्रपतङ्गाः, सूर्यः, उड्यन्ते, कूजन्ति, उदयति, सन्ति।

...........................................................................

...........................................................................

...........................................................................

शिक्षण-सङ्केतः

(क)बालकाः परस्परं प्रहेलिकाः पृच्छन्तु, इत्थं कथयत।

(ख) बालकैः अन्यप्रहेलिकानां सङ्ग्रहं कारयत।

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।

# अष्टमः पाठः श्रम एव विजयते

(शतृ-प्रत्ययः)

अमेरिकादेशे एकस्मिन् स्थाने सैनिकानाम् आवासाय निर्माणकार्यं प्रचलद् आसीत्। तत्र द्वारादिनिर्माणहेतोः काष्ठस्य गुरुतरः खण्डः नीयते स्म। केचित् सैनिकाः बृहत्कायं तं काष्ठखण्डं भूमेः उत्थाप्य यानम् आरोपयितुं यतमानाः आसन्। किन्तु काष्ठस्य अतिभारवत्वात् बहुप्रत्यये अपि ते अक्षमा जाताः।

तेषां सैनिकानाम् एकः नायकः अपि आसीत्, य दूरत एव अधिकबलप्रयोगाय तान् प्रेरयति स्म।

अत्रान्तरे कश्चित् तुरङ्गाधिरूढः आगच्छन् तत्र प्राप्तः। स भारवहने अक्षमान् सैनिकान् विलोकयन् नायकम् अवदत् - किं पश्यति भवान्? यदि एतेषां सहयोगं भवान् कुर्यात्, तदा कार्यं सुकरं स्यात्।

नायकः प्रोवाच - किं न वेत्ति भवान् ? अहम् एतेषाम् अधिकारी अस्मि। कथम् एतैः सह कार्यं कुर्याम्?

तत्कथनं श्रुत्वा सः अश्वसादी अश्वाद् अवातरत्, निजं कोटपरिधानं च अवतार्य भूमौ न्यदधात्। ततः असौ काष्ठखण्डस्य उन्नयने सैनिकैः साकं बलसाहाय्यम् अकरोत्। काष्ठखण्डः याने आरोपितः अभवत्। सर्वे तस्य सहयोगं प्राशंसन्। नायकः अपि धन्यवादं वितीर्णवान्।

तदनु स आगन्तुकः पुनः अश्वम् आरुह्य नायकम् अभाषत- महाशय! यदा कदाचिद् ईदृशः अवसरः आपतेत्, प्रधानसेनापतिः वाशिंगटनः स्मर्यताम्। स पुनरपि आगमिष्यति। स्वसेनापतिं वाशिंगटनम् अभिजानन् स नायकः लज्जितो भूत्वा क्षमाम् अयाचत। वाशिंगटनः अभाषत- " कर्तव्ये कर्मणि गुरुता लघुता वा न भवति। एतद् भूयोभूयः अवधेयम्।"

5 उपसर्गं लिखत -

**शब्दार्थाः**

द्वारादिनिर्माणहेतोः = द्वार आदि के निर्माण के लिए। उत्थाप्य = उठाकर। काष्ठस्य = लकड़ी का। यानम् = सवारी। आरोपयितुं = चढ़ाने के लिए। यतमानाः = प्रयत्नशील। अतिभारवत्वात् = अधिक भारी होने से। अक्षमाः = असमर्थ। दूरतः = दूर से। तुरगाधिरूढः = घोड़े पर सवार। सुकरम् = सरल (आसान)। परिधानम् = वस्त्र। आगच्छन् = आता हुआ।

अश्वसादी = घुड़सवार। अवधेयम् = याद रखें। प्राशंसन् = प्रशंसा किये। आपतेत् = आये। स्मर्यताम् = याद करें। अभिजानन् = जानते हुए।

अभ्यासः

1 उच्चारणं कुरुत -

द्वारादिनिर्माणहेतोः काष्ठस्य उत्थाप्य स्मार्यताम्

अतिभारवत्त्वात् आपतेत् आरुह्य आगमिष्यति

2 एकवाक्येन उत्तरत -

(क) किमर्थं काष्ठस्य गुरुतरः खण्डः नीयते स्म?

(ख) सैनिकाः कथं बहुप्रत्यये अपि अक्षमाः जाताः ?

(ग) कः दूरतः एव अधिकबल प्रयोगाय तान् प्रेरयति स्म ?

(घ) तुरगाधिरूढः पुरुषः सैनिकान् विलोकयन् नायकं किम् अवदत् ?

3 अधोलिखितपदानां विभक्तिं वचनं च लिखत -

पदम् विभक्तिः वचनम्

सैनिकानाम् ................... .....................

अश्वाद् ................... .....................

याने ................... .....................

क्षमाम्................... .....................

4 अधोलिखित क्रियापदानां लकारं पुरुषं वचनं च लिखत -

क्रियापदम् लकारः पुरुषः वचनम्

अवदत् ................. ................ ..................

भवन्ति .................. ................ ..................

आसीत् ................. ................ ..................

गमिष्यति ................. ................ ..................

अकरोत् ................. ............... .................

5. उप्सर्गम लिखत -

पदम् उपसर्गः

अधिरूढः ..................

प्रोवाच .................

अभिजानन् ..................

विलोकयन् ..................

6 मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

आवासाय काष्ठखण्डम् नायकः अश्वसादी वायुयानस्य

(क)...................... सैनिकान् प्रेरयति

(ख)...................... गतिः तीव्रा भवति।

(ग)..................... अश्वाद् अवातरत्।

(घ) इयं भूमिः .................वर्तते।

7 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) सैनिकों के आवास के लिए निर्माणकार्य चल रहा था।

(ख) उन सैनिकों का एक नायक भी था।

(ग) वह घुड़सवार घोड़े से उतरा।

(घ) कोई भी कार्य बड़ा या छोटा नहीं होता।

(ङ) मैं खाता हुआ नहीं चलता हूँ।

(च) मैं हँसता हुआ पानी नहीं पीता हूँ।

शिक्षण-सङ्केतः

1. कक्षायां छात्रैः पाठस्य अनुच्छेदानां वाचनं कारयत तथा हिन्दीभाषायाम् अर्थ-लेखनस्य गतिविधिं कारयत।

2. ‘कर्मप्रधानं जगत्’ इत्युक्तौ संस्कृते पञ्चवाक्यानि लेखयत।

आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः।

## नवमः पाठः सुभाषितानि

क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्।

क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्।।1।।

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।

तृतीये नार्जितो धर्मः चतुर्थे किं करिष्यति।।2।।

सर्वतीर्थमयी माता सर्वदेवमयः पिता।

मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत्।।3।।

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।4।।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।

प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः ।।5।।

जाड्यं धियो हरति सिञ्चति वाचि सत्यं

मानोन्नतिं दिशति पापमपाकरोति।

लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं

सत्सङ्गतिः कथय किं न करोति पुंसाम्।।6।।

अभ्यासः

1 उच्चारणं कुरुत -

क्षणशः कणशश्चैव सर्वदेवमयः पूजयेत्




क्षणशः = प्रतिपल। चिन्तयेत् = चिन्तन करना चाहिए। नार्जिता = नहीं प्राप्त किया। तुष्यन्ति = तुष्ट होते हैं। वक्तव्यम् = बोलना चाहिए। अनृतम् = झूठ। जाड्यं धियः = बुद्धि की जड़ता। पापमपाकरोति = ( पापम्+अपाकरोति) पापों को दूर करती है। तनोति = फैलाती है। दिक्षु = दिशाओं में। पुंसाम् = व्यक्तियों का।

ब्रूयात् मानोन्नतिम् पापमपाकरोति सत्सङ्गतिः

2 एकपदेन उत्तरत -

(क) क्षणत्यागे किं न भवति?

(ख) द्वितीये किं नार्जितम्?

(ग) सर्वतीर्थमयी का अस्ति?

(घ) सर्वे जन्तवः केन तुष्यन्ति?

(ङ) कीदृशं प्रियं न ब्ररूयात्?

3 रिक्तस्थानानां पूर्तिं कुरुत -

(क) कणत्यागे कुतः ................ ।

(ख) तृतीये नार्जितः ............... ।

(ग) सर्वदेवमयः .................. अस्ति ।

(घ) प्रियवाक्यप्रदानेन सर्वे ............ तुष्यन्ति।

4 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) माता-पिता की पूजा करनी चाहिए।

(ख) समय का पालन करो।

(ग) बोलने में कैसी दरिद्रता ?

(घ) प्रिय तथा सत्य बोलना चाहिए।

(ङ) प्रियवाक्य प्रदान करने से सभी जन्तु तुष्ट होते हैं।

5 उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत -

(क) कणत्यागे धनं न भवति।

(ख) विद्यार्थिजीवने विद्या न अर्जनीया।

(ग) मातरं पितरं च सर्वयत्नेन पूजयेत्।

(घ) प्रियवाक्यप्रदानेन सर्वे जन्तवः न तुष्यन्ति।

(ङ) सत्संङ्गतिः किमपि पुंसां न करोति।

6अधोलिखित-क्रियापदानां लकारं पुरुषं वचनं च लिखत -

क्रियापदम् लकारः पुरुषः वचनम्

चिन्तयेत् ................. ............ ..................

करिष्यति ................. ............ .................

ब्रूयात् ................. ............ .................

सिञ्चन्ति ................. ............ .................

7 रेखांकितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -

(क) परिश्रमेण सफलता मिलति।

(ख) मधुरवचनेन जनाः प्रसन्नाः भवन्ति।

(ग) व्यायामेन शरीरं स्वस्थं भवति।

(घ) मातुः आज्ञां पालयेत्।

(ङ) वृक्षैः प्राणवायुः प्राप्यते।

शिक्षण-सङ्केतः

1.सुभाषितश्लोकानां सामूहिकगानं कारयत।

2.श्लोकानां हिन्दीभाषायाम् अर्थं लेखयत।

एतदपि जानीत-

कुछ पशु-पक्षी के संस्कृत नाम-

दर्दुरः =त्रमेढक। वृकः =भेड़िया। मार्जारी =बिल्ली। वृषभः =बैल। बलाकः =बगुला। धेनुः =गाय। षट्पदः =भौंरा। गजः =हाथी। लूता =त्रमकड़ी। मेषः =भेंड़।कुक्कुटः= त्रमुर्गा। भल्लूकः =भालू। चातकः =त्रपपीहा। वानरः =वानर। घोटकः/अश्वः =घोड़ा। कपोतः =कबूतर।चटका =गौरैया। शृगालः =रसियार।

***अतिस्नेहः पापशङ्की***

# दशमः पाठः शठं प्रति शाठ्यम्

(कारकम् उपपदविभक्तिश्च)

पाटलिपुत्रे एको वणिक्-पुत्रः आसीत्। तस्य विभवः अनश्यत्। अतः सः धनोपार्जनाय विदेशं गन्तुमैच्छत्। तस्य गृहे पित्रोपार्जिता एका लौहमयी तुला आसीत्। सः तां तुलां कस्यचिद् धनिकस्य गृहे निक्षिप्य देशान्तरमगच्छत्। सः पुनः विपुलं धनमुपार्जयत् स्वपुरं प्रत्यागच्छत् च। धनिकस्य गृहं गत्वा सः तमवदत् - "भोः !मम तुलां मे प्रयच्छ।" सः अवदत् - "मित्र! नास्ति सा। मम गृहे प्रभूताः मूषकाः सन्ति। त्वदीयां तुलां मूषकाः अभक्षयन्।" वणिक्-पुत्रः प्रत्यवदत् - "मित्र! नास्त्यत्र युष्माकं दोषः। अस्मिन् संसारे किञ्िचदपि शाश्वतं नास्ति। एषः संसारः ईदृशः एवास्ति। दूरादागच्छामि, अतः अहं श्रान्तः। अधुनाहं नदीं स्नानार्थं गन्तुमिच्छामि, यदि ते अनुमतिर्भवेत् तदा तव पुत्रम् अपि आत्मना सह नयामि।" तेन सह स्वपुत्रप्रेषणे निजलाभं दृष्ट्वा सः धनिकः स्वपुत्रमकथयत् - "वत्स! एतद् मम मित्रं स्नानार्थं नदीं गच्छति। स्नानसामग्रीं नीत्वा तेन सह गच्छ।"

पितुर्वचनमाकर्ण्य सः अपि स्नानसामग्रीं नीत्वा तेन सहागच्छत्। नदीतटे गिरिगुहाः आसन्। वणिक्- पुत्रः नद्यां स्नानं कृत्वा तं शिशुमेकस्यां गिरि-गुहायां प्रक्षिप्य तस्याः द्वारं शिलयाच्छाद्य सत्वरं गृहं प्रत्यागच्छत्। तमेकाकिनं दृष्ट्वा स्वपुत्राय चिन्तितः स धनिकः तमपृच्छत् - "नास्ति मम पुत्रः त्वया सह। त्वमेव असि। कुत्रास्ति मे पुत्रः ? कथय।"

वणिक्-पुत्रः प्रत्यवदत् - "मित्र! भृशं लज्जितः अस्मि। अहं तव पुत्रस्य रक्षणे असमर्थः अभवम्। नद्याः तटात् तमेकः श्येनः अहरत्।" धनिकः क्रुद्धः अभवत् अवदत् च -



"असत्यम्, अनृतं च वदसि त्वम्। असम्भवमेतत्। श्येनः बालकं हर्तुं समर्थो नास्ति। प्रयच्छ मे सुतम्। अन्यथा राजद्वारे अभियोगं करिष्यामि।" वणिक्-पुत्रः अवदत् - "मित्र! सत्यमेतत्। मत्समक्षमेव तव पुत्रं श्येनः अहरत्। श्येनः तव पुत्रं कुत्रानयत् - इति न जानामि। यदि नास्ति प्रत्ययः मम कथने तदा गच्छ राजद्वारे निवेदनं कर्तुम्।"

एवं द्वौ विवादमकुरुताम्। धनिको वणिक्पुत्रं नीत्वा राजद्वारमगच्छत्। राजसभायां प्रविश्य सः धनिकः तारस्वरेण रोदनम् अकरोत्। अमात्यः तं रोदनस्य कारणम् अपृच्छत्। धनिकः सविस्तरमवर्णयत् - ‘‘कथं सः वणिक्-पुत्रः तस्य पुत्रमहरत्।’’ सर्वमाकर्ण्य स अमात्यः वणिक्पुत्रमवदत् - ‘‘भोः प्रयच्छ धनिकस्य सुतं तस्मै। क्वापि श्येनः बालकं हर्तुं समर्थः नास्ति। किमर्थमसत्यं वदसि ? त्वां कारागारे क्षेप्स्यामि यदि त्वं एतस्मै पुत्रं न प्रदास्यसि।’’



बद्धाञ्जलिः सः अवदत् - ‘‘न वदाम्यसत्यम्। यत्र लौहतुलां मूषकाः खादन्ति तत्र श्येनः अपि बालकं हरति।’’ आश्चर्यचकितः अमात्यः अपृच्छत् -‘‘कथमेवम् ?’’ वणिक्-पुत्रः आदितः सर्वं वृत्तान्तम् अकथयत्। तदाकर्ण्य सर्वे उपस्थिताः सभ्याः अहसन्, धनिकः अपि लज्जितः अभवत्। अमात्यस्याज्ञया धनिकः तां लौहतुलां वणिक्पुत्रायायच्छत्। वणिक्-पुत्रः अपि धनिकस्य सुतं तस्मै अयच्छत्। एवं तौ सन्तोषितावभवताम्। अत एव उक्तम् - ‘‘शठे शाठ्यं समाचरेत’’ इति।

### शब्दार्थाः

विभवः = सम्पत्ति। ऐच्छत् = इच्छा की। उपार्जिता = अर्जित की हुई। लौहमयी = लोहे की। तुला = तराजू। विपुलम् = पर्याप्त। प्रयच्छ = दे दो। त्वदीयाम् = तुम्हारी (स्त्री0)। अभक्षयन् = खा गये। प्रत्यवदत् = उत्तर दिया। शाश्वतम् = नित्य। नयामि = ले जाता हूँ। श्रान्तः = थका हुआ। निजलाभम् = अपना लाभ। आकर्ण्य=सुनकर। शिलया = पत्थर से। आच्छाद्य = ढँक कर। प्रक्षिप्य = रख कर, (फेंक कर)। एकाकिनम् = अकेला। भृशम् = अत्यन्त। श्येनः = बाज पक्षी। राजद्वारे = राजा के न्यायालय में। अभियोगम् = मुकदमा। अमात्यः = सचिव, मन्त्री। निक्षिप्य = रखकर। नास्त्यत्र = (न+अस्ति+अत्र) = यहाँ नहीं है। तदाकर्ण्य = (तत्+आकर्ण्य) उसे सुनकर। शठे शाठ्यं समाचरेत् = दुष्ट के साथ दुष्टता का व्यवहार करना चाहिए, जैसे को तैसा।

### अभ्यासः

उच्चारणं कुरुत -

धनोपार्जनाय पित्रोपार्जितम् शिलयाच्छाद्य अमात्यस्याज्ञया वणिक्पुत्रायायच्छत् क्षेप्स्यामि

2 एकपदेन उत्तरत-

(क)वणिक्-पुत्रः धनोपार्जनाय कुत्र अगच्छत् ?

(ख)वणिक्-पुत्रः लौहतुलां कस्य गृहे निक्षिप्य अगच्छत् ?

(ग)ममगृहे प्रभूता मूषकाः सन्ति इति कः अकथयत् ?

(घ)वणिक्-पुत्रः कुत्र शिशुं प्रक्षिप्य प्रत्यागच्छत् ?

(ङ)सः कया द्वारम् आच्छाद्य प्रत्यागच्छत् ?

3 मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत-

अपतत् निवसति स्म व्यलपत् जाता अत्रोटयत्

(क) पुरा एकस्मिन् वृक्षे एका चटका ................................।

(ख) कालेन तस्याः सन्ततिः ................................................।

(ग) प्रमत्तः गजः वृक्षस्य शाखां शुण्डेन ...........................।

(घ) चटकायाः नीडं भुवि ....................................................।

(ङ) सा चटका ........................................................................।

4 रेखांकितपदेषु कारकस्य नामोल्लेखं कुरुत -

यथा- श्यामः <u>कलमेन</u> लिखति। (करणकारकम्।) करण

(क) शेखरः <u>स्नानाय</u> नदी-तटे गच्छति। ..........................

(ख) संसारे बहवः धनिकाः सन्ति। ...........................

(ग) वणिक्-पुत्रः धनोपार्जनाय देशान्तरे अगच्छत्। ..........................

(घ) मूषकाः लौहतुलां न खादन्ति। ..........................

(ङ) विद्यालयस्य वार्षिकोत्सवः मईमासे भविष्यति। ..........................

ध्यातव्यम्-

विभक्तिः द्विविधा भवति- 1 कारकविभक्तिः। 2 उपपदविभक्तिः।

1.कारकविभक्तिः- क्रियाम् आदाय या विभक्तिः भवति सा कारकविभक्तिः भवति, यथा- रमेशः ग्रामं गच्छति, वीरेन्द्रः कन्दुकेन खेलति।

2. उपपदविभक्तिः- पदम् आश्रित्य प्रयुक्ता विभक्तिः 'उपपदविभक्तिः' इति कथ्यते,यथा- ग्रामं परितः वृक्षाः सन्ति (गाँव के चारों ओर वृक्ष हैं)। रामेण सह लक्ष्मणः गच्छति। अत्र 'परितः' (चारों ओर) इति योगे ग्रामपदात् द्वितीया तथा च 'सह' इति योगे रामपदात् प्रयुक्ता तृतीया विभक्तिः

उपपदविभक्तिः अस्ति।

5 सन्धि-विच्छेदं कुरुत -

पदम् सन्धिविच्छेदः

(क) धनोपार्जनाय ..............................................।

(ख) प्रत्यागच्छत् ..............................................।

(ग) प्रत्यवदत् ..............................................।

(घ) दूरादागच्छामि ..............................................।

6 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) त्रीणि वचनानि भवन्ति।

(ख) कारकाणि षट् सन्ति।

(ग) विभक्तयः सप्त सन्ति।

(घ) श्यामः विद्यालयं गच्छति।

(ङ) देवदत्तः आम्रं खादति।

7 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) वह धन कमाने के लिए विदेश गया।

(ख) वह विदेश से अपने घर वापस आया।

(ग) इस संसार में नित्य कुछ भी नहीं है।

(घ) आपके पुत्र को अपने साथ ले जाता हूँ।

शिक्षण-सङ्केतः

1.बालकैः स्वशब्देषु कथां लेखयत।

2.अन्यकथां श्रोतुं श्रावयितुं च कथयत।

***महान् महत्स्वेव करोति विक्रमम्।***

## एकादशः पाठः बालकः सर्वदमनः

।। ततः प्रविशति तापसीभ्यां सह बालः ।।

बालः-जृम्भस्व, रे सिंहशावक ! जृम्भस्व, दन्तान् ते गणयिष्यामि।

प्रथमा-किं नः अपत्यतुल्यानि सत्त्वानि विप्रकरोषि ? हन्त ! वर्धते इव ते संरम्भः। स्थाने खलु ऋषिजनेन 'सर्वदमनः' इति नाम कृतम्।

राजा-(प्रविश्य) (स्वगतम्) किं नु खलु बालेऽस्मिन् औरसे इव पुत्रे स्निह्यति मे हृदयम्। (विचिन्त्य) नूनम् अनपत्यता मां वत्सलयति।

द्वितीया- एषा केसरिणी त्वां लङ्घयिष्यति, यदि अस्याः पुत्रकं न मु×चसि।

बालः-(सस्मितं साभिप्रायम्) अहो ! बलीयः खलु भीतः अस्ति। (अधरं दर्शयति)

राजा-(सविस्मयम्) (स्वगतम्) महतस्तेजसो बीजं बालोऽयं प्रतिभाति।

प्रथमा - वत्स ! मुञ्च बालमृगेन्द्रम् अपरं ते क्रीडनकं दास्यामि।

बालः-कुत्र, देहि एनम्। (हस्तं प्रसारयति)।

राजा-(बालस्य हस्तं दृष्ट्वा) (स्वगतम्) कथं ! चक्रवर्तिलक्षणमपि अनेन धार्यते!

द्वितीया-(तापसीं प्रति) सुव्रते ! गच्छ मदीये उटजे ऋषिकुमारस्य वर्णचित्रितः मृत्तिकामयूरः तिष्ठति। तम् अस्य उपहर।

प्रथमा-तथा। (इति निष्क्रान्ता)

राजा-(स्वगतम्) स्पृह्यामि खलु

दुर्ललिताय अस्मै। (इति निःश्वसिति)

द्वितीया-(साङ्गुलितर्जनम्) भोः ! न मां गणयसि। (पूर्वमवलोक्य) कोऽत्र ऋषिकुमाराणाम् ? (राजान दृष्ट्वा) भद्रमुख ! एहि तावत्। मोचय, अनेन शिशुना बाध्यमानं बालमृगेन्द्रम्।

राजा-तथा। (उपगम्य सस्मितम्) अयि भो महर्षिपुत्रक !

द्वितीया-न खलु एष ऋषिकुमारः।

राजा-आकारसदृशं चेष्टितमेवास्य कथयति। (बालकं स्पृशति)

द्वितीया-(उभौ विलोक्य) आश्चर्यम् ! आश्चर्यम् ! अस्य बालकस्य संवादिनी आकृतिरिति विस्मितास्मि। अपि च वचनेन ते प्रकृतिस्थः संवृत्तः।

राजा-(बालकम् उपलालयन्) आर्ये ! न चेद् मुनिकुमारोऽयम् , तत् कोऽस्य व्यपदेशः ?

द्वितीया-पौरव इति।

राजा-(स्वगतम्) कथम् ! एकान्ववायः अयम् अस्माकम्। (प्रकाशम्) कथम् ! आत्मगत्या

मानुषाणाम् इह निवासः।

द्वितीया-यथा भद्रमुखो भणति, किन्तु अप्सरसः सम्बन्धेन अस्य बालकस्य जननी इहैव देवगुरोः तपोवने प्रसूता।

राजा-अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ?

द्वितीया-कस्तस्य धर्मदारापरित्यागिनः नाम कीर्तयिष्यति ?

प्रथमा-(ततः प्रविशति मृण्मयूरहस्ता प्रथमा तापसी) सर्वदमन ! प्रेक्षस्व शकुन्तलावण्यम्।

बालः-कुत्र सा मम अम्बा ?

उभे-(प्रहसतः)

द्वितीया-मयूरस्य रमणीयतां प्रेक्षस्व इति भणितोऽसि।

राजा-(स्वगतम्) किं शकुन्तला इति अस्य मातुः नाम ?

बालः-न मे रोचते एष मृत्तिकामयूरः।

राजा-(सहर्षम् आत्मगतम्) तत् किं खलु इदानीं पूर्णम् आत्मनो मनोरथं नाभिनन्दामि। (इति बालकं परिष्वजते)

बालः-मु×च माम् , मु×च माम् , अम्बायाः सकाशं गमिष्यामि।

राजा-पुत्र ! मयैव सह मातरम् अभिनन्दिष्यसि।

बालः-दुष्यन्तो मम तातः , न खलु त्वम्।

(ततः प्रविशति एकवेणीधरा शकुन्तला)

राजा-(शकुन्तलां विलोक्य सहर्षखेदम्) अये ! सेयम् अत्रभवती शकुन्तला।

बालः-(मातरम् उपगम्य) अम्ब ! कः एषः मां पुत्रक इति सस्नेहम् आलिङ्गति।

शकुन्तला-आर्यपुत्र एव एषः। (सहर्षम्) जयतु, जयतु आर्यपुत्रः। (इत्यर्धोक्ते बाष्परुद्धकण्ठी विरमति)

बालः-अम्ब ! कः एषः ?

शकुन्तला-आत्मनो भागधेयानि पृच्छ।

राजा-देवि, यो मे सम्मोहः तदा अभूत् तं क्षन्तुमर्हसि।

(इति पादयोः पतति)

शकुन्तला-उत्तिष्ठतु आर्यपुत्र!, उत्तिष्ठतु।

राजा-(उत्थाय बालम् अङ्के निवेश्य शकुन्तलां विलोकयति। नेपथ्ये हर्षध्वनिः)

।। पटाक्षेपः ।।

### शब्दार्थाः

तापसीभ्याम् सह = दो तपस्विनियों के साथ। जृम्भस्व = मुँह फैलाओ। गणयिष्यामि = गिनूँगा। अपत्यतुल्यानि = सन्तान के समान। सत्त्वानि = प्राणियों को। विप्रकरोषि = परेशान करते हो। संरम्भः = क्रोध, उग्रता। औरसे = अपनी विवाहिता पत्नी की कोख से उत्पन्न। अनपत्यता = सन्तान रहित होना। वत्सलयति = वात्सल्यप्रेमयुक्त कर रहा है। केसरिणी = सिंहिनी। लङ्घयिष्यति = आक्रमण कर देगी। बालमृगेन्द्रम् = सिंहशिशु को। क्रीडनकम् = खिलौना। चक्रवर्तिलक्षणम् = हाथ पर चक्रवर्ती सम्राट् का चिह्न। उटजे = कुटिया में। मृत्तिकामयूरः = मिट्टी का मोर। निष्क्रान्ता = निकल गयी। दुर्ललिताय = नटखट (बालक) के लिए। साङ्गुलितर्जनम् = अँगुली से डराता हुआ। मोचय = छुड़ाओ। आकारसदृशम् = आकृति के अनुरूप। चेष्टितम् = कार्यव्यापार। संवादिनी = मेल खाती हुई। उपलालयन् = दुलारते हुए। व्यपदेशः = नाम, वंश। एकान्ववायः = एक (समान) वंश वाला। अप्सरसः सम्बन्धेन = अप्सरा के साथ सम्बन्ध होने से। देवगुरोः = देवताआंे के पिता कश्यप के। प्रसूता = पैदा हुई। धर्मदारपरित्यागिनः = धर्मपत्नी को छोड़ देने वाले। प्रेक्षस्व = देखो। शकुन्तलावण्यम् = पक्षी की सुन्दरता। भणितः = कहे गये। परिष्वजते = गले लगाता है, आलिङ्गन करता है। एकवेणीधरा = एक चोटी धारण की हुई। अत्रभवती = माननीया। अर्धोक्ते = आधा ही कहने पर, बीच में। बाष्परुद्धकण्ठी = आँसू से रुँधे गले

वाली। विरमति = रुक जाती है। भागधेयानि = भाग्य को। सम्मोहः = गलतफहमी, भ्रम। क्षन्तुमर्हसि = क्षमा करे।

## अभ्यासः

1 उच्चारणं कुरुत -

जृम्भस्व गणयिष्यामि अपत्यतुल्यानि सत्त्वानिविप्रकरोषि स्निह्यति मृत्तिकामयूरः

2एकवाक्येन उत्तरत -

(क) सर्वदमनः कस्य दन्तान् गणयितुम् इच्छति ?

(ख) राजानं किं वत्सलयति ?

(ग) प्रथमा तापसी बालाय किं दातंु कथयति ?

(घ बालेन कीदृशं लक्षणं धार्यते ?

(ङ) शकुन्तलां दृष्ट्वा राजा किमवदत् ?

3 निम्नलिखितपदानि निर्देशानुसारं परिवर्तयत -

यथा- वानरः (प्रथमा बहुवचने)वानराः

सर्वदमनः(प्रथमा बहुवचने).......................

बालकः(तृतीया एकवचने).......................

अहम्(षष्ठी बहुवचने).......................

शकुन्तला(द्वितीया एकवचने).......................

त्वम्(सप्तमी बहुवचने).......................4वाक्यशुद्धिं कुरुत-

(क) एषः केसरिणी त्वां लङ्घयिष्यति।

(ख) अपरं क्रीडनकम् अहं दास्यति।

(ग) आकारसदृशः तस्य कार्यम् अस्ति।

(घ) कः अत्र एषा ?

5 सन्धि-विच्छेदं कुरुत-

पदम् सन्धि-विच्छेदः

स्वागतम् ..........................

मृगेन्द्रः ..........................

सेयम् .........................

इहैव .........................

वातावरणम् .........................

6 मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

संवादिनी दन्तान् बाध्यमानम् स्निह्यति

(क) ...........ते गणयिष्यामि।

(ख) बालेऽस्मिन् औरसे इव पुत्रे .............मे हृदयम्।

(ग) मोचय अनेन शिशुना.............बालमृगेन्द्रम्।

(घ) अस्य बालकस्य ................आकृतिः।

ध्यातव्यम्-

गणयिष्यामि= 'गण्' धातुना लृट्-लकारे उत्तमपुरुषस्य एकवचने इदं रूपं भवति। एवमेव लङ्घयिष्यति, कीर्तयिष्यति, अभिनन्दिष्यसि चेत्यादीनि रूपाणि लृट्-लकारे (भविष्यत्काले) भवन्ति।

क- 'स्पृह्' धातुना योगे चतुर्थी विभक्तिः भवति, यथा- स्पृह्यामि अस्मै।

ख-'स्निह्' धातुना योगे सप्तमी विभक्तिः भवति,यथा- अस्मिन् बाले मे हृदयं स्निह्यति।

शिक्षण-सङ्केतः

छात्रैः विशेषायोजनेषु अस्य नाटकस्य अभिनयं कारयत।

एतदपि जानीत-

रामायण एवं महाभारत आर्ष काव्य के रूप में जाने जाते हैं।

## द्वादशः पाठः आदिकविः वाल्मीकिः

(अनु, आङ्, वि, उपसर्गाः)



पुरा वाल्मीकिः नाम एकः ऋषिः आसीत्। एकदा सः शिष्यैः सह स्नातुं तमसानद्याः तीरम् अगच्छत्। मार्गे सः व्याधेन विद्धम् एकं क्रौञ्चपक्षिणमपश्यत्। सहचरस्य वियोगेन व्याकुलितायाः क्रौञ्च्याः रोदनम् उच्चैः क्रन्दनञ्च अशृणोत्। तत् श्रुत्वा तस्याः दयनीयां दशां दृष्ट्वा च कारुणिकः ऋषिः द्रवितोऽभवत्। क्रौञ्चीक्रन्दनात् जातः ऋषेः शोकः श्लोकरूपेण तस्य मुखात् एवं निरगच्छत्-

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।

यत्क्रौञ्चमिथुनादेकम् अवधीः काममोहितम्।।



अयमेव श्लोकः लौकिकसंस्कृतसाहित्यस्य आदिकाव्यरचना। ततः प्रभृति ऋषिरयं कविपदं प्राप्तः। ऋषेः कवित्वं विज्ञाय ब्रह्मा आकाशवाण्या आदिशत्- ‘‘ऋषे! कुरु रामायणं काव्यम्। तत्र च रामचरितं वर्णय, येन रामस्य पुण्यं चरित्रं विदित्वा लोकाः सन्मार्गस्यानुसरणं कुर्युः।’’ ब्रह्मणः आदेशानुसारेण वाल्मीकिना श्लोकबद्धा रामायणीकथा लिखिता। सैव वाल्मीकीयरामायणनाम्ना प्रसिद्धिम् उपगता।

अत्र कविना अनेकविधानि तथ्यानि वर्णितानि, यानि मानवजीवने मार्गदर्शकानि सन्ति। अस्मिन् काव्ये वाल्मीकिना पितुः आज्ञापालनम् , भ्रातृस्नेहः, परोपकारः, दया, दाक्षिण्यम्, दीनरक्षा इत्यादीनि मानवतायाः पोषकानि जीवनमूल्यानि वर्णितानि सन्ति। अयं कविः संस्कृतस्य आदिकविः उच्यते तद्रचना च आदिकाव्यम् उच्यते।

### शब्दार्थाः

व्याधेन = बहेलिया द्वारा। क्रौञ्चपक्षिणम् = क्रौञ्च नामक पक्षी को। उच्चैः = जोर-जोर से। क्रन्दनम् = विलाप को, चीख़ को। कारुणिकः = दयालु। निषाद! = हे व्याध। प्रतिष्ठाम् = सम्मान। शाश्वतीः समाः = अनेक वर्षों तक ,चिर काल तक। क्रौञ्चमिथुनात् = क्रौञ्च पक्षी के जोड़े से। अवधीः = मार दिया। ततः प्रभृति = से लेकर। विज्ञाय = जानकर। विदित्वा = जानकर। दाक्षिण्यम् = उदारता, अनुकूलता। जीवनमूल्यानि = आदर्श जीवन के मूल्य।

### अभ्यासः

1 उच्चारणं कुरुत-

तमसानद्याः व्याकुलितायाः कौञ्चीक्रन्दनात्

यत्कौञ्चमिथुनादेकम् सन्मार्गस्यानुसरणम् दाक्षिण्यम्

2 एकवाक्येन उत्तरत-

(क) वाल्मीकिः स्नातुं कुत्र अगच्छत् ?

(ख) किं श्रुत्वा किं दृष्ट्वा च ऋषिः द्रवितोऽभवत् ?

(ग) ब्रह्मा आकाशवाण्या वाल्मीकिं किम् आदिशत् ?

(घ) वाल्मीकिना श्लोकबद्धा का कथा लिखिता ?

(ङ) संस्कृतस्य आदिकविः कः ?

3निम्नलिखितपदानां विभक्तिं वचनं च लिखत-

पदम् विभक्तिः वचनम्

शिष्यैः .................. ..................

नदीम् .................. ..................

जीवने .................. ..................

रामस्य.................. ..................

4निम्नलिखितपदेषु प्रयुक्तं उपसर्गं पृथक् कुरुत-

पदम् उपसर्गः शब्दः

वियोगेन .................. ..................

अनुकरणम् ................... ..................

प्रसिद्धिम् ................... ..................

अपमानम् .................. ..................

आहारः .................. ..................

5संस्कृतभाषायाम् अनुवादं कुरुत-

(क) सभी छात्र स्नान करने के लिए नदी के किनारे गये।

(ख) वाल्मीकीयरामायण में राम का चरित वर्णित है।

(ग) वाल्मीकि ऋषि ने क्रौञ्ची का रोना सुना।

(घ) ब्रह्मा ने वाल्मीकि को आदेश दिया।

(ङ) महापुरुषों के चरित्र का अनुसरण करो।

6 मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

कविपदम् ऋषिः क्रौञ्चपक्षिणम् आदिकविः

(क) पुरा वाल्मीकिः नाम एकः...........आसीत्।

(ख) व्याधेन विद्धम् एकं..............अपश्यत्।

(ग) ततः प्रभृति ऋषिरयं...............प्राप्तः।

(घ) अयं कविः संस्कृतस्य ..................उच्यते।

7 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) एकदा ऋषिःशिष्यैः सह स्नातं‌ु गतः।

(ख) कारुणिकः ऋषिः द्रवितः अभवत्।

(ग) ब्रह्मा आकाशवाण्या ऋषिम् आदिशत्।

(घ) वाल्मीकिना रामायणी कथा लिखिता।

(ङ) अयं कविः आदिकविः उच्यते।

8 पदानि चित्वा कथां पूरयत-

दुर्दान्तनामकः, मारयति स्म, बिडालकस्य, कृत्वा,

अनयत्, कर्तुम्, उपेक्षाम्, दुःखी, मूषकाः, समाप्ताः।

एकस्मिन् पर्वते..................... सिंहः निवसति स्म। सः मूषकैः पीडितः आसीत्। रात्रिकाले...............तस्य केशान् कर्तयन्ति स्म। प्रातः सिंहः केशान् अधः दृष्ट्वा ............. भवति स्म। एकदा सः मूषकानाम् उपायम्...... संकल्पम् अकरोत्। चिन्तामग्नः सः वने बिडालकम् अपश्यत्। बिडालकेन सह मित्रतां ............... स्वगुहां प्रति..........

मूषकाः...........भयेन विवरेषु केवलं शब्दं कुर्वन्ति स्म। यदा क्षुधापीडया मूषकाः बहिः आगच्छन्ति, तदा बिडालकः तान्.................। एवं शनैः-शनैः मूषकाः............। स्वार्थे सिद्धे सिंहः विडालकस्य ........... अकरोत्। समाजे स्विार्थिभिः सावधानाः भवेम।

शिक्षण-सङ्केतः

1. पाठस्य श्लोकार्थं लघुसमूहेषु लेखनस्य गतिविधिं कारयत।

2.कक्षायां पाठस्य वाचनं कारयत।

3.वाल्मीकिविषये दशवाक्यानि संस्कृतभाषायां लेखयत।

जीवितं यः स्वयं चेच्छेत् कथं सोऽन्यं प्रघातयेत्।

# त्रयोदशः पाठः यक्षयुधिष्ठिर-संवादः



यक्ष उवाच

किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्।

किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात्।।1।।

युधिष्ठिर उवाच

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।

मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्।।2।।

यक्ष उवाच

किंस्वित् प्रवसतो मित्रं किंस्वित् मित्रं गृहे सतः।

आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः।।3।।

युधिष्ठिर उवाच

सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः।

आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः।।4।।

यक्ष उवाच

कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः।

कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः।।5।।

युधिष्ठिर उवाच

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः।

सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।।6।।

यक्ष उवाच

कः पण्डितः पुमान् ज्ञेयो नास्तिकः कश्च उच्यते।

को मूर्खः कश्च कामः स्यात् को मत्सर इति स्मृतः।।7।।

युधिष्ठिर उवाच

धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते।

कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ।।8।।

**शब्दार्थाः**

किंस्वित् = कौन। खात् = आकाश से। बहुतरम् = अपेक्षाकृत अधिक। प्रवसतः = परदेश में रहने वाले का। आतुरस्य = रोगी का। मरिष्यतः = मरने वाले का।सार्थः = सहयात्री। भिषक् = वैद्य। दुर्जयः = कठिनाई से जीतने योग्य। पुंसाम् = मनुष्यों का। अनन्तकः = कभी अन्त न होने वाला। सर्वभूतहितः = सभी प्राणियों का हित करने वाला। पुमान् = पुरुष। मत्सरः = ईर्ष्या, ईर्ष्यालु। धर्मज्ञः = धर्म को जानने वाला। हृत्तापः = हृदय की जलन।

अभ्यासः

1 उच्चारणं कुरुत-

किंस्विदुच्चतरम् किंस्विच्छीघ्रतरम् पितोच्चतरस्तथा वाताच्चिन्ता

भिषङ्मित्रम् शत्रुर्दुर्जयः व्याधिरनन्तकः साधुरसाधुनिर्दयः

2 अधोलिखितान् यक्षस्य प्रश्नान् युधिष्ठिरस्य च उत्तराणि पठित्वा मननं कुरुत-

| यक्षस्य प्रश्नानि | युधिष्ठिरस्य उत्तराणि |
|---|---|
| १. भूमेः गुरुतरं किंस्वित् ? | १. भूमेः गुरुतरा माता। |
| २. खात् उच्चतरं च किंस्वित् ? | २. पिता खात् उच्चतरः। |
| 3.वायोः शीघ्रतरं किंस्वित् ? | ३. वातात् शीघ्रतरं मनः। |
| ४. तृणात् बहुतरं किंस्वित् ? | ४. तृणात् बहुतरी चिन्ता। |

| | |
|---|---|
| ५. प्रवसतः मित्रं किंस्वित् ? | ५. प्रवसतः मित्रं सार्थः। |
| ६. गृहे सतः मित्रं किंस्वित् ? | ६. गृहे सतः मित्रं भार्या। |
| ७. आतुरस्य च किं मित्रम् ? | ७. आतुरस्य मित्रं भिषक्। |
| 8. मरिष्यतः मित्रं किम् ? | ८. मरिष्यतः मित्रं दानम्। |
| ९. पुंसां दुर्जयः शत्रुः कः ? | ९. (पुंसाम्) दुर्जयः शत्रुः क्रोधः। |
| १0. (पुंसाम्) अनन्तकः व्याधिः कः? | १0. (पुंसाम्) अनन्तकः व्याधिः लोभः। |
| ११. साधुः कीदृशः स्मृतः ? | ११. सर्वभूतहितः साधुः स्मृतः। |
| १२. असाधुः कीदृशः स्मृतः ? | १२. निर्दयः असाधुः स्मृतः। |
| १३. कः पुमान् पण्डितः ज्ञेयः ? | १३. धर्मज्ञः पण्डितः ज्ञेयः। |
| १४. कश्च (पुमान्) नास्तिकः उच्यते ? | १४.मूर्खः (पुमान्) नास्तिकः उच्यते। |
| १५. मूर्खः कः कामश्च कः (उच्यते) ? | १५. नास्तिकः मूर्खः, संसारहेतुः कामः। |
| १६. मत्सरः कः उच्यते? | १६. हृत्तापः मत्सरः स्मृतः। |

ध्यातव्यम्

भूमःे गुरुतरा माता (भूमि की अपेक्षा माता महान् है) अपेक्षाशब्देन कृतायां तुलनायां पञ्चमी विभक्तिः

भवति। तरप् (तर)-प्रत्ययान्तशब्दाः विशेषणरूपे प्रयुक्ताः भवन्ति, यथा- उच्चतरम्, महत्तरम्,

पटुतरम् इत्यादयः।

3संस्कृतभाषायाम् अनुवादं कुरुत -

(क) देवदत्त प्रभाकर की अपेक्षा चतुर है।

(ख) यह मिठाई उस मिठाई से मधुर है।

(ग) विन्ध्याचल से हिमालय ऊँचा है।

(घ) ज्ञान से आचरण श्रेष्ठ है।

(ङ) पाप से पुण्य बड़ा है।

4 उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षम् 'न' इति लिखत -

(क) माता भूमेः गुरुतरा अस्ति। ..............................

(ख) मनः वातात् शीघ्रतरं न। ..............................

(ग) आतुरस्य धनं मित्रम्। ..............................

(घ) दानं मरिष्यतः मित्रम्। ..............................

(ङ) निर्दयः असाधुः स्मृतः। ..............................

शिक्षण-सङ्केतः

1. शिक्षकः अस्मिन् संदर्भे सन्दर्शिकायाः अवलोकनं कुर्यात्।

2.महाभारते आगतस्य यक्ष-युधिष्ठिर-संवादस्य चर्चां कुर्यात्।

एतदपि जानीत-

कुछ मसालों के नाम संस्कृत भाषा में-

| **हिन्दी** | **संस्कृत** | **हिन्दी** | **संस्कृत** |
|---|---|---|---|
| जीरा | जीरकम् | धनिया | धान्याकम् |
| मिर्च | मरिचम् | अदरक | आर्द्रकम् |
| हल्दी | हरिद्रा | सौंफ | मधुरिका |
| मेथी | मेथिका | अजवाइन | यवानी |
| हींग | हिंगुः | लौंग | लवङ्गम् |
| इलायची | एला | तेजपात | तेजपत्रम् |
| नमक | लवणम् | सेंधानमक | सैन्धवम् |

## चतुर्दशः पाठः वीराङ्गना विश्पला

वैदिकयुगे कश्चित् ‘खेलः’ इति नाम्ना प्रसिद्धः राजा आसीत्। सः क्रीडायाम् अतीव कुशलः विशेषज्ञश्च आसीत्, अतएव तस्य नाम ‘खेलः’ इति आसीत्।



तस्य पत्नी अतीव युद्धनिपुणा वीराङ्गना आसीत्, यस्या नाम ‘विश्पला’ इति आसीत्।

एकस्मिन् युद्धे सा युद्धं कुर्वन्ती शत्रुभिः परिवेष्टिता जाता, तस्याः द्वौ अपि पादौ छिन्नौ, सा विकलाङ्गी अभवत्, परन्तु वीराङ्गना विश्पला हतोत्साहा न जाता, तस्याः साहसं वीरताम् उत्साहं च दृष्ट्वा खेलराजस्य मार्गनिर्देशकः अगस्त्यः तस्याम् एव रात्रौ देवचिकित्सकौ अश्विनीकुमारौ आहूतवान्, तौ च विश्पलायै लौहनिर्मितौ पादौ अकल्पयताम्। सा च वीराङ्गना ततः अतीवोत्साहयुक्ता शत्रुभिः निहितं धनं जितवती।

इत्थं पूर्वं विकलाङ्गी अपि विश्पला वीराङ्गना लौहपादसाहाय्येन शत्रून् जित्वा तदीयं धनम् आहृतवती। अत एवोक्तम् -

“ क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।” इति।




वीराङ्गना = वीर स्त्री। कुर्वन्ती = करती हुई। परिवेष्टिता जाता = घेर ली गयी। छिन्नौ = कट गये। हतोत्साहा = उत्साह रहित। आहूतवान् = बुलाया। अकल्पयताम् = जोड़ दिया, बना दिया। निहितम् = जमा किया हुआ। इत्थम् = इस प्रकार। आहृतवती = ले ली। अत एवोक्तम् = (अत एव+उक्तम्) इसलिए कहा गया है। सत्त्वे = पराक्रम में। उपकरणे = साधन में।

अभ्यासः

1 उच्चारणं कुरुत -

कश्चित् विशेषज्ञश्च वीराङ्गना विश्पला लौहनिर्मितौ अकल्पयताम् लौहपादसाहाय्येन परिवेष्टिता

2 एकवाक्येन उत्तरत -

(क) विश्पला का आसीत् ?

(ख) सा कस्य पत्नी आसीत् ?

(ग) अगस्त्यः किम् अकरोत् ?

(घ) युद्धे तस्याः किम् अभवत् ?

(ङ) उत्साहयुक्ता विश्पला किम् अकरोत् ?

3सन्धि-विच्छेदं कुरुत-

पदम् सन्धि-विच्छेदः

वीराङ्गना ........................

विकलाङ्गी ........................

नोपकरणे ........................

4 पाठस्य आधारे रिक्तस्थानानि पूरयत -

(क) वैदिक युगे कश्चित् .....................राजा आसीत्।

(ख) तस्य पत्नी..........वीराङ्गना आसीत्।

(ग) एकस्मिन् युद्धे सा .........................शत्रुभिः परिवेष्टिता जाता ।

(घ) वीराङ्गना विश्पला ..................न जाता ।

5 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) सः क्रीडाविषये अतीवकुशलः विशेषज्ञश्चासीत्।

(ख) तस्य पत्नी अतीव युद्धनिपुणा वीराङ्गना आसीत्।

(ग) क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।

6 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) विश्पला एक बार युद्ध में शत्रुओं के द्वारा घेर ली गयी।

(ख) अश्विनीकुमारों ने लोहे के पैर लगा दिये।

(ग) उसने पुनः युद्ध किया तथा शत्रुओं को जीत लिया।

7 कर्तुः पुरुष-वचनानुसारं क्रियापदं चित्वा वाक्यं रचयत -




..............................................

..............................................

..............................................

..............................................

..............................................

..............................................

..............................................

## शिक्षण-सङ्केतः

शिक्षकः 'अपराजिता' इति (शिवानी-लिखिताम्) कथां श्रावयेत्।

वदतु संस्कृतम्

खेलितुं मित्रेण सह अनुरोधः



किशोरः कौशल! खेलितुं चलिष्यसि ?

कौशलः अवश्यं चलिष्यामि।

किशोरः आम्, खेलने तु तव मन एव लगति। तर्हि आगच्छ।

कौशलः चलामि जलपानं कृत्वा। आगच्छ, किञ्चित् त्वमपि जलपानं कुरु।

किशोरः अहन्तु इदानीम् एव कृत्वा आगच्छामि।

कौशलः अस्तु, अहमपि सज्ज एव जातः। इदानीं चलितव्यम्। कन्दुकं वर्तते ?

किशोरः कन्दुकं तु मम वर्तते परं वायुः निर्गतः अस्ति। त्वं आत्मनः कन्दुकं गृहाण।

कौशलः कथं वायुः निर्गतः ?

किशोरः गतदिने खेलनकाले एकेन कण्टकेन कन्दुकम् अपविद्धम्।

कौशलः अस्तु, तर्हि अवश्यमेव आनयामि। परं कदाचित् इदमपि अपविद्धं न जायेत।

किशोरः नहि, अद्य कण्टकानि अपनीय खेलिष्यामः।

कौशलः तदा शोभनं भविष्यति। चलतु। अहं कन्दुकं गृहीत्वा अनुपदमेव आगच्छामि।

विशेषः- संस्कृते सम्भाषण-कौशलस्य विकासाय उपयुक्त-पुस्तकानाम् उपयोगं कारयत।

## पञ्चदशः पाठः संस्कृतम्

भारतीयैकता-साधकं संस्कृतम्
भारतीयत्व-सम्पादकं संस्कृतम्
ज्ञान-पुञ्ज - प्रभादर्शकं संस्कृतम्
सर्वदानन्द-सन्दोहदं संस्कृतम्।।1।।

विश्वबन्धुत्व-विस्तारकं संस्कृतम्
सर्वभूतैकता-कारकं संस्कृतम्
सर्वतः शान्तिसंस्थापकं संस्कृतम्
पञ्चशील- प्रतिष्ठापकं संस्कृतम्।।2।।

त्याग-सन्तोष-सेवा-व्रतं संस्कृतम्
विश्वकल्याण-निष्ठायुतं संस्कृतम्
ज्ञान - विज्ञान - सम्मेलनं संस्कृतम्
भुक्ति-मुक्ति-द्वयोद्भावनं संस्कृतम्।।3।।

नगरे-नगरे ग्रामे-ग्रामे विलसतु संस्कृत-वाणी।
सदने-सदने जन-जनवदने जयतु चिरं कल्याणी। ।4।।

### शब्दार्थाः

भारतीयैकता-साधकम् = भारतीय एकता को सिद्ध करने वाला। भारतीयत्व-सम्पादकम् = भारतीयता की भावना का सम्पोषक। ज्ञानपुञ्जप्रभादर्शकम् = ज्ञान-समूह के प्रकाश को दिखलाने वाला। आनन्दसन्दोहदम् = आनन्द समूह को देने वाला। सर्वभूतैकता = सभी प्राणियों के प्रति ऐक्यभावना। सर्वतः = चारों ओर। शान्तिसंस्थापकम् = शान्ति की स्थापना करने वाला। पञ्चशीलप्रतिष्ठापकम् = पञ्चशील के सिद्धान्तों की प्रतिष्ठा करने वाला। त्यागसन्तोषसेवाव्रतम् = त्याग, सन्तोष और सेवा व्रत वाली। विश्वकल्याणनिष्ठायुतम् = विश्व की भलाई की निष्ठा से युक्त। भुक्तिमुक्तिद्वयोद्भावनम् = भोग और मोक्ष दोनों की उद्भावना (उत्पत्ति) करने वाली। सदने = घर में। चिरम् = बहुत समय तक (सदा)। कल्याणी = कल्याण करने वाली।

अभ्यासः

1 उच्चारणं कुरुत -

भारतीयैकता भारतीयत्वम् सन्दोहदम्

विश्वबन्धुत्वम् सर्वभूतैकता प्रतिष्ठापकम्

2 एकवाक्येन उत्तरत -

(क) संस्कृतं कस्य साधकम् अस्ति ? (ख) संस्कृतं कस्य विस्तारकम् अस्ति ?

(ग) संस्कृतं कयोः सम्मेलनम् अस्ति ?

(घ) भुक्तिमुक्तिद्वयोद्भावनं किम् अस्ति ?

(ङ) कल्याणी का अस्ति ?

3 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) पञ्चशीलप्रतिष्ठापकं संस्कृतम् ।

(ख) नगरे-नगरे, ग्रामे-ग्रामे विलसतु संस्कृत-वाणी।

(ग) विश्ववन्धुत्व-विस्तारकं संस्कृतम्।

ध्यातव्यम्-

विशेष्ये यत् लिङ्गम्, या विभक्तिः, यत् वचनं च भवति, विशेषणेऽपि तत् लिङ्गम्, सा विभक्तिः

तत् वचनं च भवति, यथा- शोभनः छात्रः (पु0), शोभना छात्रा (स्त्री), शोभनं पुस्तकम् (नपु0)।

4 पाठे आगतानि विशेष्य-विशेषणपदानि लिखत -

यथा- साधकं संस्कृतम्।

.......................................................................................................................................

.......................................................................................................................................

5 विशेष्यपदानां पूर्वम् उपयुक्तविशेषणपदं लिखत-

(क) ............. पुष्पम्। (सुन्दरः, सुन्दरम्।)

(ख) ................ चित्रम्। (मनोहरम्, मनोहारी।)

(ग) .................कमले। (सुन्दरे, सुन्दराः।)

(घ) ....................वस्त्राणि। (स्वच्छः, स्वच्छानि।)

6 सन्धि-विच्छेदं कुरुत -

(क) भारतीयैकता..................

(ख) सर्वभूतैकता...................

(ग) सर्वदानन्दम् .................

7 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) संस्कृत विश्वबन्धुत्व को फैलाने वाली है।

(ख) संस्कृत चारों ओर शान्ति की स्थापना करने वाली है।

(ग) संस्कृत ज्ञान-विज्ञान का मेल कराने वाली है।

8 मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

विलसतु संस्कृतम् जयतु

(क) ज्ञानपुञ्ज-प्रभादर्शकम् ....................................।

(ख) नगरे-नगरे, ग्रामे-ग्रामे ................................ संस्कृतवाणी।

(ग) सदने-सदने, जन-जनवदने ........................ चिरं कल्याणी।

शिक्षण-सङ्केतः

1. पञ्चशीलसिद्धान्तस्य विषये छात्रान् बोधयत।

2. श्लोकानां सामूहिकं सस्वरगानं कारयत।

मनोरञ्जनाय

## हास्यं सुद्ध्युपास्यम् (चुटकुला)

एकः बाबू होतले गत्वा-वेतर वेतर इति अवदत्। वेतरः-(आगत्य) बाबू महोदय! बाबू-तव होतले किं किमस्ति ? शीघ्रम् आनय क्षुधा बाधते। वेतरः (केषाञ्चित् वस्तूनां मूल्यं संयुज्य देयकपत्रं करोति) गृह्णातु बाबू ११० रूप्यकाणां देयकपत्रं अस्ति। रूप्यकाणि यच्छतु। बाबू- अरे देयकपत्रं तु भोजनस्य पश्चात् दीयते त्वं प्रागेव यच्छसि। वेतरः -वार्ता एषा अस्ति यद् ह्यः एकः बाबू भुक्त्वा एव मृतः। तस्य देयं मयैव दत्तम्। अतः अहं प्रथममेव रुप्यकाणि गृह्णामि।



भावार्थ- एक बाबू जी होटल में जाकर- वेटर वेटर पुकारने लगे। वेटर (आकर)- जी बाबू जी। बाबू- तुम्हारे होटल में क्या-क्या है। जल्दी लाओ भूख लगी है। वेटर (कुछ वस्तुओं का मूल्य गिनकर बिल बनाता है) लीजिए बाबू जी ११० रुपये का बिल है, रुपये दीजिए। बाबू- अरे बिल तो बाद में दिया जाता है, तुम पहले क्यों माँग रहे हो? वेटर- बात यह है कि कल एक बाबू खाते ही मर गया था और उसका बिल मुझे भरना पड़ा। (आज मैं जोखिम नहीं ले सकता।) इसलिए मैं पहले ही रुपये ले रहा हूँ।

## षोडशः पाठः विश्वबन्धुत्वम्

## (वृद्धिसन्धिः)

विश्वस्य सर्वान् जनान् प्रति बन्धुत्वस्य भावः एव विश्वबन्धुत्वम् इति कथ्यते। शान्तिमयाय जीवनाय विश्वबन्धुत्वस्य भावना नितरां महत्त्वं भजते। भावनैषा अपरिहार्या आवश्यकता। सर्वजनहितं सर्वजनसुखं च बन्धुत्वं विना न सम्भवति। विश्वबन्धुत्वम् एव दृष्टौ निधाय केनापि मनीषिणा निर्दिष्टम्-



अयं निजः परो वेति गणना लघुचेतसाम्।

उदारचरितानां तु वसुधैव कुटुम्बकम्।।

साम्प्रतम् अखिले जगति कलहस्य अशान्तेः च साम्राज्यं व्याप्तम् अस्त्,ि येन साधनसम्पन्नः अपि मानवः सुखस्य स्थाने दुःखम् एव अनुभवति। यद्यपि ज्ञानबलेन मानवः इदानीं वायुयानेन आकाशे विचरितुं, जलपोतेन सागरान् सन्तर्तुं, रेलयानेन विश्वभ्रमणं कर्तुं ग्रहयानेन चन्द्रादिग्रहेषु च गन्तुं समर्थः अस्ति, तथापि परस्परं सम्बन्धानां कटुतया स अशान्तः एव दृश्यते, कष्टं च अनुभवति। अस्य प्रधानं कारणं विश्वबन्धुत्वस्य अभावः एव।

विगतयोः द्वयोः विश्वयुद्धयोः विनाशलीलां सर्वे जानन्ति एव। इदानीं तृतीयस्य युद्धस्य सम्भावना सर्वदा मानवजातिम् आक्रान्तां करोति, येन विश्वस्य भयंकरो नाशो भवितुं शक्नोति। अतः आवश्यकता अस्ति यत् मानवः मानवं प्रति बन्धुवत् आचरणं कुर्यात्। एकः देशः अन्येन देशेन सह बन्धुतायाः व्यवहारं कुर्यात्। सबलाः देशाः दुर्बलानां देशानाम् उपरि आक्रमणं न कुर्युः। स्वार्थस्य लोलुपतायाः महत्त्वाकाङ्क्षायाः च स्थाने परोपकारस्य, दयायाः, त्यागस्य, परस्परं सहयोगस्य च प्रसारो भवेत्।

यद्यपि शान्तिस्थापनार्थं संयुक्तराष्ट्रसंघः, निर्गुटान्दोलनम्, अन्यानि संघटनानि च सततं प्रयत्नं कुर्वन्ति, तथापि स्वार्थस्य, अहंकारस्य, शक्तिवर्धनस्य च दूषितेन भावेन भ्रान्ताः केचिद् देशाः संघर्षरताः सन्ति, येन विरोधः अशान्तिश्च वर्धते। अनेन मानवः एव मानवहन्ता सञ्जातः। सर्वत्र प्रेम्णः बन्धुत्वस्य च अभावो वर्तते, याभ्यां विना शान्तिः जीवने दुर्लभा जाता।

संसारे सर्वेषु मानवेषु समानं रक्तं प्रवहति, सर्वेषां च नियन्तैकः एव अस्ति। एतत्सर्वं जानन्तः अपि जनाः स्वार्थपारायणतया परस्परं कलहं कुर्वन्ति। अस्य मूलं कारणं विश्वबन्धुत्वस्य

अभाव एव अस्ति। अत एव सर्वेषु विश्वबन्धुत्वस्य भावना नितान्तम् अपेक्षिता वर्तते। विश्वबन्धुत्वे इयमेव भावना सन्निहिता विद्यते -

" सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।"

शब्दार्थाः

नितराम् = पूरी तरह से। अपरिहार्या = अनिवार्य। सम्भवति = सम्भव हो सकता है। मनीषिणा = विद्वानों से। परो वेति = (परः वा इति) अथवा दूसरे का है ऐसा मानना। लघुचेतसाम् = छोटे हृदय वालों का। आक्रान्ताम् = भयभीत। नियन्तैकः = (नियन्ता+एकः) नियन्ता एक है। साम्प्रतम् = इस समय। सन्तर्तुम् = पार करने के लिए। भ्रान्ताः = भटके हुए। हन्ता = मारने वाला। सञ्जातः = हो गया। निरामयाः = रोगरहित। भद्राणि = कल्याण। प्रेम्णः = प्रेम का। नितान्तम् = अतिशय, अत्यधिक।

अभ्यासः

1 एकपदेन उत्तरत -

(क) वसुधैव कुटुम्बकं केषां मते भवति ?

(ख) मानवः मानवं प्रति कीदृशम् आचरणं कुर्यात् ?

(ग) एकः देशः अन्येन देशेन सह कीदृशं व्यवहारं कुर्यात् ?

(घ) सर्वेषु मानवेषु समानं किं प्रवहति ?

(ङ) जनाः परस्परं कलहं किमर्थं कुर्वन्ति ?

2 एकवाक्येन उत्तरत -

(क) बन्धुत्वं विना किं न सम्भवति ?

(ख) संयुक्तराष्ट्रः कीदृशं प्रयत्नं करोति ?

(ग) कीदृशी भावना नितान्तम् अपेक्षिता वर्तते ?

(घ) सर्वेषां नियन्ता कः ?

3 विभक्तिं वचनं च लिखत -

पदम् विभक्तिः वचनम्

कलहस्य .................. ...................

अखिलान् .................. ...................

जनान् .................. ...................

रेलयानेन .................. ...................

4 सन्धि-विच्छेदं कुरुत -

पदम् सन्धि-विच्छेदः

केनापि .................................

तदैव .................................

परोपकारस्य .................................

वेति .................................

वसुधैव .................................

समस्यैका .................................

5 मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

वसुधैव विश्वयुद्धयोः आकाशे भवति

(क) ज्ञानबलेन मानवाः इदानीं वायुयानेन ................ विचरितुं समर्थाः।

(ख) विगतयोः द्वयोः .................. विनाशलीलां सर्वे जानन्ति एव।

(ग) उदारचरितानां तु ................. कुटुम्बकम्।

(घ) अशान्तस्य च कदापि सुखं न ................।

6 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) एक देश दूसरे देश के साथ बन्धुता का व्यवहार करें।

(ख) विश्वबन्धुत्व ही सुख का एकमात्र कारण है।

(ग) सभी मनुष्यों का हृदय विशाल हो।

(घ) सभी मनुष्य सुखी रहें।

(ङ) उदार चरित्र वालों के लिए पृथ्वी ही परिवार है।

7 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) सर्वजनहितं बन्धुत्वं विना न भवति।

(ख) मा कश्चिद् दुःखभाग् भवेत्।

(ग) बन्धुत्वं विना जनाः कष्टम् अनुभवन्ति।

(घ) अतः आवश्यकतास्ति यद् मानवः बन्धुतां स्थापयेत्।

(ङ) इदं विश्वं विविधाभिः समस्याभिः पीडितम् अस्ति।

शिक्षण-सङ्केतः

विश्वबन्धुत्वस्य महत्त्वे चर्चां कारयत।

## सप्तदशः पाठः स्त्रीपुरुषयोः समाधिकारः

स्त्रियः पुरुषाश्च मिलित्वा समाजस्य निर्माणं कुर्वन्ति, समाजस्य परिवारस्य च भारं वहन्ति। परन्तु समाजस्य कल्याणं तदा एव भवति यदा स्त्रीपुरुषयोः समभावो भवेत्। समभावस्य अयं भावः न नवीनः, अपितु प्राचीनकालादेव प्रचलितः अस्ति।



प्राचीनकाले यथा पुरुषाः विद्वांसः भवन्ति स्म तथैव स्त्रियः अपि विदुष्यः भवन्ति स्म, यथा-गार्गी, अपाला, लोपामुद्रा, सावित्री, भारती तथैवान्याः अपि बह्व्यः विदुष्यः आसन्।

वैदिकवाङ्मये नार्यः मन्त्रद्रष्ट्र्यः अभवन् , यथा - अपाला - घोषा - रोमगा - विश्ववारा - लोपामुद्रा वीराङ्गना = वीर स्त्री। कुर्वन्ती = करती हुई। परिवेष्टिता जाता = घेर ली गयी। छिन्नौ = कट गये। हतोत्साहा = उत्साह रहित। आहूतवान् = बुलाया। अकल्पयताम् = जोड़ दिया, बना दिया। निहितम् = जमा किया हुआ। इत्थम् = इस प्रकार। आहृतवती = ले ली। अत एवोक्तम् = (अत एव+उक्तम्) इसलिए कहा गया है। सत्त्वे = पराक्रम में। उपकरणे = साधन में।-सावित्री - प्रभृतयः। पुरा सामूहिकयज्ञेषु युद्धेषु च स्त्रियः भागं गृह्णन्ति स्म। गार्गी ब्रह्मवादिनी, तीक्ष्णबुद्धिः अध्यात्मतत्त्वस्य विवेचिका च अभवत्। सा याज्ञवल्क्येन सह शास्त्रार्थमकरोत् तथा याज्ञवल्क्यं निरुत्तरम् अकरोत्। याज्ञवल्क्यपत्नी मैत्रेयी अपि प्रज्ञावती सूक्ष्मविवेचिका परमतत्त्वचिन्तने दक्षा चासीत्। आचार्यमण्डनमिश्रस्य पत्नी भारती अतीव विदुषी साक्षात् सरस्वत्यवतारभूता आसीत्। तस्याः वैशिष्ट्यमिदं यत् आचार्यशङ्करेण सह सा मण्डनमिश्रस्य शास्त्रार्थे निर्णायिकाऽभवत्। यदा मण्डनमिश्रः पराजितोऽभवत् तदा स्वयमपि सा शास्त्रार्थं शङ्करेण सह कृतवती।



आधुनिके समाजेऽपि स्त्रियः पुरुषस्य समकक्षतां प्राप्तुमग्रसराः सन्ति। दृश्यतां तावत्- विमानचालने, चन्द्रगमने, जलयानचालने ताः अग्रेसरन्ति। साम्प्रतं मनुष्याणां जीवनदृष्टिः परिवर्तिता। पुरुषवत् स्त्रियः अपि सार्वजनिकराजकीयसेवासु संलग्नाः दृश्यन्ते। व्यापारे, आपणेष्वपि तासां संख्या पुरुषापेक्षया अन्यूना। सम्प्रति राजनीतौ अपि स्त्रियः पुरुषैः सार्धं सहयोगितया प्रगतिं कुर्वन्ति। ताः पार्षदविधायक-सांसदेत्यादीनि पदानि चालंकुर्वन्ति,

भाषणेऽपि तासाम् ओजस्विता अवलोक्यते। किं बहुना, राष्ट्रपति - प्रधानमन्त्रि - मन्त्रि - प्रभृतीनि महत्त्वपूर्णानि पदानि भूषयन्त्यः गौरवं लभन्ते। को नाम न जानाति- सरोजिनी नायडू - विजयलक्ष्मीपण्डित - सुचेताकृपलानी - पद्मजा नायडू - इन्दिरागान्धी - अरुणाआसफ अलीप्रभृतीनां स्त्रीरत्नानां नामानि ? क्रिकेट - बालीबाल - टेनिसेत्यादिषु पाश्चात्यक्रीडाक्षेत्रेष्वपि नवाः युवतयः बालिकाश्च देशान्तरेषु गत्वा विजयं प्राप्य जगति भारतस्य मानं वर्धयन्ति। आधुनिक समये तु कबड्डीभारोत्तोलनसदृशीषु भारतीयक्रीडास्वपि ताः स्पर्धन्ते। सम्पन्नायाम् ओलम्पिकक्रीडाप्रतिस्पर्धांयां भारोत्तोलने कर्णममल्लेश्वरी पदकं प्राप्तवती। शिक्षाक्षेत्रेऽपि युवतयः प्राध्यापकाचार्यपदेषु प्रतिष्ठिताः सन्ति। केवलं न कुलपतिपदं प्रत्युत मन्त्रिपदमपि ताः भूषयन्ति। स्त्रीपुरुषयोः अयं समभावः समाधिकारो वा नूनमेव समाजस्य प्रगतिपथं पुष्णाति।

## शब्दार्थाः

समभावः = समानता की भावना। मन्त्रदªष्ट्र्यः = मन्त्र के अर्थ का साक्षात्कार करने वाली। ब्रह्मवादिनी = ब्रह्मविषयक ज्ञान में निष्णात। परमतत्त्वचिन्तने = अध्यात्म तत्त्व के चिन्तन में। प्रज्ञावती = बुद्धिमती। दक्षा = समर्थ। समकक्षताम् = समानता को। आपणेषु = दुकानों मंे। सहयोगितया = (सहयोगी के रूप में) कंधे से कंधा मिलाकर। भूषयन्तः = शोभित करती हुई। पुष्णाति = पुष्ट करता है। सरस्वत्यवतारभूता = (सरस्वति+अवतारभूता) सरस्वती का अवतार। अग्रेसरन्ति = आगे चलती हैं। आपणेष्वपि = (आपणेषु+अपि) बाजारों में भी। सांसदेत्यादीनि = (सांसद+इत्यादीनि) सांसद इत्यादि।

## अभ्यासः

1 उच्चारणं कुरुत-

मन्त्रद्रष्ट्र्यः तीक्ष्णबुद्धिः अध्यात्मतत्त्वस्य सरस्वत्यवतारभूतः वैशिष्ट्यमिदम्
कबड्डीभारोत्तोलनसदृशीषु ओलम्पिकक्रीडा-प्रतिस्पर्धायाम्

2 एकवाक्येन उत्तरत -

(क)समाजस्य निर्माणं के कुर्वन्ति ?

(ख)समाजस्य कल्याणं कदा भवति ?

(ग)प्राचीनकाले अस्माकं देशे काः विदुष्यः आसन् ?

(घ)मन्त्रद्रष्ट्र्यः नार्य्यः काः ?

(ङ)गार्गी केन सह शास्त्रार्थमकरोत् ?

(च) मैत्रेयी कीदृशी आसीत् ?

(छ)शङ्कर-मण्डनयोः शास्त्रार्थे निर्णायिका का ?

3 पदेषु सन्धि-विच्छेदं कुरुत -

पदम् सन्धि-विच्छेदः

तथैव ............................................

चन्द्रोपरि ............................................

क्षेत्रेऽपि ............................................

शास्त्रार्थे ............................................

4 पदानां विग्रहं कृत्वा समासनाम लिखत-

पदम् समासविग्रहः समासनाम्

समाजसेवा ......................... ..........................

मातापितरौ ......................... ..........................

क्रीडाक्षेत्रम् ......................... ..........................

स्त्रीपुरुषौ ......................... ..........................

याज्ञवल्क्यपत्नी ......................... ..........................

5 निम्नलिखितपदेषु उपसर्गं लिखत -

पदम् उपसर्गः

विजयम् .....................

संलग्नः .....................

प्रचलितः .....................

प्राध्यापकः .....................

6 मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

प्राचीनकालादेव कर्णममल्लेश्वरी भारती निर्माणम्

(क) स्त्रियः पुरुषाश्च मिलित्वा समाजस्य .........कुर्वन्ति।

(ख) समभावस्य अयं भावः न नवीनः अपितु........प्रचलितः अस्ति।

(ग) मण्डनमिश्रस्य पत्नी ......... अतीव विदुषी आसीत्।

(घ) भारोत्तोलने............ पदं प्राप्तवती।

7 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) समाज मे स्त्री और पुरुष का महत्त्व समान है।

(ख) स्त्री और पुरुष की समानता की भावना प्राचीनकाल से है।

(ग) वह युद्ध तथा यज्ञों में भी भाग लेती थी।

(घ) माता बच्चों की प्रथम शिक्षिका होती हैं।

(ङ) भारत की प्रथम महिला राष्ट्रपति प्रतिभा देवी सिंह पाटिल हैं।

(च) इस समय भारतीय राजनीति में महिलाओं की महती भूमिका है।

8 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) पुरा यज्ञेषु युद्धेषु च स्त्रियः भागं गृह्णन्ति स्म।

(ख) भारती स्वयमपि शङ्करेण सह शास्त्रार्थं कृतवती।

(ग) समाधिकारो नूनमेव समाजस्य प्रगतिपथं पुष्णाति।

शिक्षण-सङ्केतः

स्त्रीपुरुषयोः समानतायाः स्वरूपं छात्रान् स्पष्टं कारयत।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

## पुनरावृत्तिः

1 दीर्घस्वराः के-के सन्ति, इति लिखत।

2 संयुक्तव्यञ्जनानां पञ्च उदाहरणानि लिखत।

3 निम्नलिखित-वर्णानाम् उच्चारणस्थानानि लिखत-

ई, ण, ए, ब, व।

4 अक्’ प्रत्याहारे ‘एङ्’ प्रत्याहारे च के के वर्णाः भवन्ति, इति लिखत।

5 ‘श’, ‘ष’ स’ चैतेषाम् उच्चारणस्थानानि वदत।

6 निम्नलिखितपदेषु सन्धि-विच्छेदं कृत्वा सन्धिनाम लिखत

पदम् सन्धि-विच्छेदः सन्धि-नाम

सूक्तिः .....................................

औषधालयः .....................................

तथापि .....................................

सूर्योदयः .....................................

7 निर्देशानुसारेण शब्दरूपाणि लिखत -

शब्दः रूपम्

‘राम’ शब्दस्य तृतीयाविभक्तेः बहुवचने .....................

‘रमा’ शब्दस्य षष्ठीविभक्तेः एकवचने .....................

‘पुस्तक’ शब्दस्य सप्तमीविभक्तेः बहुवचने .....................

‘नदी’ शब्दस्य षष्ठीविभक्तेः एकवचने .....................

8 शुद्धेषु उत्तरेषु ( ✔ ) चिह्नं योजयत्-

(क) कारकाणि सन्ति। (षट्/सप्त/अष्ट)

(ख) विभक्तयः सन्ति। (षट्/सप्त/अष्ट)

(ग) त्वं पठसि। (पुस्तकम्/पुस्तकस्य)

(घ) सीता फलं खादति। (मधुरः/मधुरम्)

कर्तुः पुरुष-वचनानुसारं क्रियाप्रयोगं कुरुत-

| कर्तृपदानि | | | | क्रियापदानि | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपु0 | सः | तौ | ते | पठति | पठतः | पठन्ति |
| | सा | ते | ताः | | | |
| | बालकः | बालकौ | बालकाः | | | |
| | बालिका | बालिके | बालिकाः | | | |
| | मोहनः | मोहनौ | मोहनाः | | | |
| मध्यमपु0 | त्वम् | युवाम् | यूयम् | पठसि | पठथः | पठथ |
| उत्तमपु0 | अहम् | आवाम् | वयम् | पठामि | पठावः | पठामः |

एतदपि जानीत-

| कुछ कपड़ों के संस्कृत नाम- | | | |
|---|---|---|---|
| **<u>हिन्दी</u>** | **<u>संस्कृत</u>** | **<u>हिन्दी</u>** | **<u>संस्कृत</u>** |
| धोतीसाड़ी | धौतवस्त्रम्शाटिका | रूमाल | कर्पटः |
| अगौछी (तौलिया) | अङ्गप्रोक्षणी | पगड़ी | उष्णीषः |
| कमीज | कञ्चुकः | टोपी | टोपिका |
| हाफकमीज | अर्धकञ्चुकः | बिछौना | आस्तरणम् |
| अँगौछा | अङ्गरक्षकम् | तकिया | उपधानम् |
| चद्दर | उत्तरीयम् | रजाई | तूलपटी |
| गद्दा | तूलिका/तोशकः | गद्दी | मर्दिका |

**व्याकरणम्**

## सन्धिः

## वृद्धि-सन्धिः

वृद्धिरेचि- (1) अ या आ के बाद ए या ऐ हो तो दोनों के स्थान पर 'ऐ' होगा।

(2) अ या आ के बाद ओ या औ हो तो दोनों के स्थान पर 'औ' होगा।

(1)

यथा- (अ+ए= ऐ) अत्र+एव= अत्रैव

(आ+ए= ऐ) तथा+एव = तथैव

(अ+ऐ =ऐ) जन+ऐक्यम् = जनैक्यम्

(आ+ऐ =ऐ) महा+ ऐश्वर्यम् = महैश्वर्यम्

(2)

(अ+ओ =औ) जल+ओघः = जलौघः, (जल की धारा)।

(आ+ओ =औ) महा+ओषधिः = महौषधिः

(अ+औ =औ) जन+औत्सुक्क्यम् = जनौत्सुक्यम

(आ+औ=औ) महा+औत्सुक्यम् = महौत्सुक्यम्

**यण्-सन्धिः**

'इको यणचि' - इ या ई के बाद कोई भिन्न स्वर हो तो इ/ई के स्थान में य् हो जाता है।

उ या ऊ के बाद कोई भिन्न स्वर हो तो उ/ऊ के स्थान पर व् हो जाता है।

ऋ के बाद कोई भिन्न स्वर हो तो ऋ के स्थान पर र् हो जाता है।

लृ के बाद कोई भिन्न स्वर हो तो लृ के स्थान पर ल् हो जाता है।

(1) (2)

प्रति + एकम् = प्रत्येकम् सु +आगतम् = स्वागतम्

प्रति + अक्षम् = प्रत्यक्षम् मधु +अरिः = मध्वरिः

परि+ आवरणम् = पर्यावरणम् अनु + एषणम् = अन्वेषणम्

(3) (4)

पितृ + आदेशः = पित्रादेशः लृ +अकारः = लकारः

मातृ + ए = मात्रे लृ +आकृतिः = लाकृतिः

**अयादि-सन्धिः**

'एचोऽयवायावः'- ए को अय्, ओ को अव्, ऐ को आय् औ को आव् हो जाता है, बाद में कोई स्वर हो तो।

(1) (2)

ने + अनम् = नयनम् पो + अनः = पवनः

शे+ अनम् = शयनम् भो + अनम् = भवनम्

सञ्चे + अः = सञ्चयः भो + अति = भवति

चे + अनम् = चयनम्

(3) (4)

गै + अकः = गायकः पौ + अकः = पावकः

नै + अकः = नायकः नौ + इकः = नाविकः

भौ + उकः = भावुकः

शब्द-रूपाणि

संज्ञा (इकारान्त-पुंल्लिङ्ग-शब्दः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मुनिः | मुनी | मुनयः |
| द्वितीया | मुनिम् | मुनी | मुनीन् |
| तृतीया | मुनिना | मुनिभ्याम् | मुनिभिः |
| चतुर्थी | मुनये | मुनिभ्याम् | मुनिभ्यः |
| पञ्चमी | मुनेः | मुनिभ्याम् | मुनिभ्यः |
| षष्ठी | मुनेः | मुन्योः | मुनीनाम् |

| | | | |
|---|---|---|---|
| सप्तमी | मुनौ | मुन्योः | मुनिषु |
| सम्बोधनम् | हे मुने ! | हे मुनी! | हे मुनयः! |

**पति**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पतिः | पती | पतयः |
| द्वितीया | पतिम् | पती | पतीन् |
| तृतीया | पत्या | पतिभ्याम् | पतिभिः |
| चतुर्थी | पत्ये | पतिभ्याम् | पतिभ्यः |
| पञ्चमी | पत्युः | पतिभ्याम् | पतिभ्यः |
| षष्ठी | पत्युः | पत्योः | पतीनाम् |
| सप्तमी | पत्यौ | पत्योः | पतिषु |
| सम्बोधनम् | हे पते! | हे पती! | हे पतयः! |

पतिशब्दः मुनिशब्दात् किञ्चिद्भिन्नः अस्ति।

मुनिशब्दानुसारेण यति-विधि-निधि-वह्नि-व्याधि-भूपति-सेनापतीत्यादीनाम् इकारान्त-पुंल्लिङ्गशब्दानां रूपाणि भवन्ति।

उकारान्त-पुंल्लिङ्ग-शब्दः

भानु (सूर्य)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | भानवः |
| द्वितीया | भानुम् | भानू | भानून् |
| तृतीया | भानुना | भानुभ्याम् | भानुभिः |
| चतुर्थी | भानवे | भानुभ्याम् | भानुभ्यः |
| पञ्चमी | भानोः | भानुभ्याम् | भानुभ्यः |

| | | | |
|---|---|---|---|
| षष्ठी | भानोः | भान्वोः | भानूनाम् |
| सप्तमी | भानौ | भान्वोः | भानुषु |
| सम्बोधनम् | हे भानो! | हे भानू! | हे भानवः! |

एवमेव विधु-विष्णु-शिशु-वायु-मृत्यु-बाहु-इत्यादीनाम् उकारान्त-पुंल्लिङ्गशब्दानां रूपाणि भवन्ति।

गुरु

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधनम् | हे गुरो! | हे गुरू! | हे गुरवः! |

येषु शब्देषु ऋ-र-ष-परतः नकारः दृश्यते तत्र ‘न’ स्थाने ‘ण’ भवति।

ऋकारान्त-पुंल्लिङ्ग-शब्दः

पितृ

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |

| | | | |
|---|---|---|---|
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः! | हे पितरौ! | हे पितरः! |

एवमेव, भातृ-जामातृ-देवृ-(देवर)-इत्यादीनाम् ऋकारान्त-पुंल्लिङ्ग शब्दानां रूपाणि भवन्ति।

इकारान्त-स्त्रीलिङ्ग-शब्दः

मति

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः/मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्/मतौ | मत्योः | मतिषु |
| सम्बोधनम् | हे मते! | हे मती! | हे मतयः! |

एवमेव गति-भक्ति-रुचि-शान्ति-नीति-जाति-इत्यादीनाम् इकारान्तस्त्रीलिङ्गशब्दानां रूपाणि भवन्ति।

सप्तमीचतुर्षुचतसृषु

ईकारान्त स्त्रीलिङ्ग-शब्दः

नदी

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |

| | | | |
|---|---|---|---|
| तृतीया<br>चतुर्थी<br>पञ्चमी<br>षष्ठी<br>सप्तमी<br>सम्बोधनम् | नद्या<br>नद्यै<br>नद्याः<br>नद्याः<br>नद्याम्<br>हे नदि! | नदीभ्याम्<br>नदीभ्याम्<br>नदीभ्याम्<br>नद्योः<br>नद्योः<br>हे नद्यौ! | नदीभिः<br>नदीभ्यः<br>नदीभ्यः<br>नदीनाम्<br>नदीषु<br>हे नद्यः! |

एवमेव पार्वती-गौरी-देवी-त्रिलोकी-कौमुदी-इत्यादीनाम् ईकारान्त स्त्रीलिङ्गशब्दानां रूपाणि भवन्ति।

उकारान्त-स्त्रीलिङ्ग-शब्दः

धेनु (गाय)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा<br>द्वितीया<br>तृतीया<br>चतुर्थी<br>पञ्चमी<br>षष्ठी<br>सप्तमी<br>सम्बोधनम् | धेनुः<br>धेनुम्<br>धेन्वा<br>धेनवे/धेन्वै<br>धेनोः/धेन्वोः<br>धेनोः/धेन्वोः<br>धेनौ/धेन्वाम्<br>हे धेनो | धेनू<br>धेनू<br>धेनुभ्याम्<br>धेनुभ्याम्<br>धेनुभ्याम्<br>धेन्वोः<br>धेन्वोः<br>हे धेनू! | धेनवः<br>धेनूः<br>धेनुभिः<br>धेनुभ्यः<br>धेनुभ्यः<br>धेनूनाम्<br>धेनुषु<br>हे धेनवः! |

एवमेव तनु-रज्जु-रेणु-चञ्चु (चोंच) इत्यादीनाम् उकारान्त-स्त्रीलिङ्गशब्दानां रूपाणि भवन्ति

इकारान्त-नपुंसकलिङ्ग-शब्दः

वारि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा<br>द्वितीया | वारि<br>वारि | वारिणी<br>वारिणी | वारीणि<br>वारीणि |

| | | | |
|---|---|---|---|
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधनम् | हे वारि/वारे! | हे वारिणी! | हे वारीणि! |

एवमेव अस्थि-सक्थि-दधि-अक्षि-इत्यादीनाम् इकारान्त-नपुंसकलिङ्गशब्दानां रूपाणि भवन्ति।

उकारान्त-नपुंसकलिङ्गशब्दः

मधु

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधनम् | हे मधु/मधो! | हे मधुनी! | हे मधूनि! |

एवमेव वस्तु-तालु-जानु (घुटना)-दारु (लकड़ी) इत्यादीनाम् उकारान्त-नपुंसकलिङ्गशब्दानां रूपाणि भवन्ति।

सर्वनामशब्दाः

पुंल्लिङ्गम्

एतत् (यह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |

| | | | |
|---|---|---|---|
| द्वितीया<br>तृतीया<br>चतुर्थी<br>पञ्चमी<br>षष्ठी<br>सप्तमी | एतम्/एनम्<br>एतेन/एनेन<br>एतस्मै<br>एतस्मात्<br>एतस्य<br>एतस्मिन् | एतौ/एनौ<br>एताभ्याम्<br>एताभ्याम्<br>एताभ्याम्<br>एतयोः/एनयोः<br>एतयोः/एनयोः | एतान्/एनान्<br>एतैः<br>एतेभ्यः<br>एतेभ्यः<br>एतेषाम्<br>एतेषु |

स्त्रीलिङ्गम्

एतत् (यह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा<br>द्वितीया<br>तृतीया<br>चतुर्थी<br>पञ्चमी<br>षष्ठी<br>सप्तमी | एषा<br>एताम्<br>एतया<br>एतस्यै<br>एतस्याः<br>एतस्याः<br>एतस्याम् | एते<br>एते<br>एताभ्याम्<br>एताभ्याम्<br>एताभ्याम्<br>एतयोः<br>एतयोः | एताः<br>एताः<br>एताभिः<br>एताभ्यः<br>एताभ्यः<br>एतासाम्<br>एतासु |

नपुंसकलिङ्गम्

एतत् (यह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा<br>द्वितीया | एतत्<br>एतत्/एनत् | एते<br>एते | एतानि<br>एतानि |

शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।

विशेषः- सर्वनामशब्दानां सम्बोधने रूपाणि न भवन्ति।

## सर्वनाम-शब्दः

### पुंल्लिङ्गम्

### तत् (वह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

### स्त्रीलिङ्गम्

### तत् (वह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

### नपुंसकलिङ्गम्

### तत् (वह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |

शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।

### सर्वनाम-शब्दः

#### पुंल्लिङ्गम्

#### यत् (जो)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

#### स्त्रीलिङ्गम्

#### यत् (जो)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतुर्थी | यस्यै | याभ्याम् | याभ्यः |
| पञ्चमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु |

नपुंसकलिङ्गम्

यत् (जो)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |

शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।

विशेषण-शब्दः

पुंल्लिङ्गम्

महत्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | महान् | महान्तौ | महान्तः |
| द्वितीया | महान्तम् | महान्तौ | महतः |
| तृतीया | महता | महद्भ्याम् | महद्भिः |
| चतुर्थी | महते | महद्भ्याम् | महद्भ्यः |
| पञ्चमी | महतः | महद्भ्याम् | महद्भ्यः |
| षष्ठी | महतः | महतोः | महताम् |
| सप्तमी | महति | महतोः | महत्सु |
| सम्बोधनम् | हे महन्! | हे महान्तौ! | हे महान्तः! |

स्त्रीलिङ्गम्

महत्

महत्शब्दस्य स्त्रीलिङ्गे ‘महती’ रूपं भवति, महतीशब्दस्य रूपं नदीशब्दवद् भवति।

नपुंसकलिङ्गम्

महत्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| प्रथमा | महत् | महती | महान्ति |
| द्वितीया | महत् | महती | महान्ति |

शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।

संख्याः

एक

| विभक्तिः | पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| प्रथमा | एकः | एका | एकम् |
| द्वितीया | एकम् | एकाम् | एकम् |
| तृतीया | एकेन | एकया | एकेन |
| चतुर्थी | एकस्मै | एकस्यै | एकस्मै |
| पञ्चमी | एकस्मात् | एकस्याः | एकस्मात् |
| षष्ठी | एकस्य | एकस्याः | एकस्य |
| सप्तमी | एकस्मिन् | एकस्याम् | एकस्मिन् |

एकशब्दस्य रूपं त्रिषु लिङ्गेषु एकवचने एव भवति।

द्वि

| विभक्तिः | पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| प्रथमा | द्वौ | द्वे | द्वे |
| द्वितीया | द्वौ | द्वे | द्वे |
| तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| षष्ठी | द्वयोः | द्वयोः | द्वयोः |
| सप्तमी | द्वयोः | द्वयोः | द्वयोः |

द्विशब्दस्य रूपं त्रिषु लिङ्गेषु द्विवचने एव भवति। स्त्रीलिङ्गस्य तथा नपुंसकलिङ्गस्य रूपाणि समानानि भवन्ति। त्रि-चतुर्-शब्दयोः रूपाणि त्रिषु लिङ्गेषु केवलं बहुवचने भवन्ति।

त्रि

| विभक्तिः | पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| प्रथमा | त्रयः | तिस्रः | त्रीणि |
| द्वितीया | त्रीन् | तिस्रः | त्रीणि |
| तृतीया | त्रिभिः | तिसृभिः | त्रिभिः |
| चतुर्थी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| पञ्चमी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| षष्ठी | त्रयाणाम् | तिसृणाम् | त्रयाणाम् |
| सप्तमी | त्रिषु | तिसृषु | त्रिषु |

चतुर्

| विभक्तिः | पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| प्रथमा | चत्वारः | चतस्रः | चत्वारि |
| द्वितीया | चतुरः | चतस्रः | चत्वारि |
| तृतीया | चतुर्भिः | चतसृभिः | (शेषरूपाणि |
| चतुर्थी | चतुर्भ्यः | चतसृभ्यः | पुंल्लिङ्गवद् |
| पञ्चमी | चतुर्भ्यः | चतसृभ्यः | भवन्ति। |
| षष्ठी | चतुर्णाम्/चतुर्ण्णाम् | चतसॄणाम् | |
| सप्तमी | चतुर्षु | चतसृषु | |

**कारक तथा विभक्ति-**

क्रियान्वयित्वं कारकत्वम्- जिन पदों का क्रिया के साथ सीधा सम्बन्ध होता है, उन्हें हम कारक कहते हैं। वह छह प्रकार के होते हैं-

कर्ता कर्म च करणं सम्प्रदानं तथैव च।

अपादानाधिकरणे इत्यादुः कारकाणि षट्।।

| **कारक** | **विभक्ति** | **विभक्ति-चिह्न** |
|---|---|---|
| कर्ता | प्रथमा | ने |
| कर्म | द्वितीया | को |
| करण | तृतीया | से, द्वारा |
| सम्प्रदान | चतुर्थी | के लिये |
| अपादान | पञ्चमी | से (अलग होना) |
| सम्बन्ध | षष्ठी | का, के, की |
| अधिकरण | सप्तमी | में, पै, पर |
| सम्बोधन | प्रथमा | हे ! अरे ! भो ! |

विशेष- कारकों में सम्बन्ध (षष्ठी विभक्ति) और सम्बोधन (प्रथम विभक्तिकी) की गणना नहीं की जाती है।

कर्म कारक

कर्तुः ईप्सिततमं कर्म-कर्ता अपनी क्रिया द्वारा जिससे सम्बन्ध करना चाहता है अर्थात् जिसको सबसे अधिक चाहता है, उस कारक की कर्म संज्ञा होती है, जैसे- 'बालकः ग्रामं गच्छति'

इस वाक्य में कर्ता बालक अपनी गमन क्रिया द्वारा गाँव से सम्बन्ध करना चाहता है। अतः गाँव की कर्मसंज्ञा और द्वितीया विभक्ति हो गयी है। इसी तरह राजीवः पुस्तकं पठति, अभिलाषा चित्रं पश्यति।

कर्मणि द्वितीया- कर्म को बताने के लिये द्वितीया विभक्ति होती है, जैसे-

बालकः रसं पिबति।

कुछ द्विकर्मक (दो कर्मवाली) धातुओं के साथ अपादान आदि के स्थान पर द्वितीया विभक्ति होती है, वे धातुएं निम्नलिखित हैं-

दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-बू-शासु-जि-मथ्-मुषाम्।

कर्मयुक् स्याद् अकथितं तथा स्यान्-नी-हृ-कृष् वहाम्।।

यथा-

दीपकः गां दुग्धं दोग्धि। (दीपक गाय से दूध दुहता है)-दुह्
वामनः बलिं वसुधां याचते। (वामन बलि से भूमि माँगता है)-याच्
माता तण्डुलान् ओदनं पचति। (माता चावल से भात बनाती है)-पच्
न्यायाधीशःअपराधिनं लक्षं दण्डयति। (जज अपराधी को एक लाख का दण्ड देता है।)-दण्ड्
श्यामः गां व्रजम् अवरुणद्धि। (श्याम गाय को ब्रज में रोकता है)-रुध्
अध्यापकः छात्रं प्रश्नं पृच्छति। (अध्यापक छात्र से प्रश्न पूछता है) प्रच्छ्
कृषकः वृक्षं फलानि अवचिनोति। (किसान वृक्ष से फल चुनता है) चि
गुरुः शिष्यं उपदेशं ब्रूते। (गुरु शिष्य को उपदेश देता है) -ब्रू,
गुरुः शिष्यं धर्मंशास्ति। (गुरु शिष्य को धर्म का अनुशासन करता है) - शास्
राहुलः रोहितं शतं जयति। (राहुल रोहित से सौ रुपये जीतता है)-मुष्
देवः क्षीरनिधिं सुधां मथ्नाति। (देवता समुद्र को अमृत के लिए मथते हैं)- मथ्
राकेशः हरेशं शतं मुष्णाति। (राकेश हरेश के सौ रुपये चुराता है)-मुष्
चारकः अजां ग्रामं नयति, हरति, कर्षति, वहति वा। (चराने वाला बकरी को गाँव ले जाता है, हरता है, खीचता है, ढोता है।)-नी-हृ, कृष्, वह्।

संख्याएं (मूलरूप)

एक 1 एक सोलह 16 षोडशन्

दो 2 द्वि सत्रह 17 सप्तदशन्

तीन 3 त्रि अट्ठारह 18 अष्टादशन्

चार 4 चतुर् उन्नीस 1९ नवदशन्,एकोनविंशति, ऊनविंशति

पाँच 5 पञ्चन् बीस 20 विंशति

छह 6 षष् इक्कीस 21 एकविंशति

सात 7 सप्तन् बाईस 22 द्वाविंशति

आठ 8 अष्टन् तेईस 23 त्रयोविंशति

नौ ९ नवन् चौबीस 24 चतुर्विंशति

दस 10 दशन् पच्चीस 25 पञ्चविंशति

ग्यारह11 एकादशन् छब्बीस 26 षड्विंशति

बारह 12 द्वादशन् सत्ताईस 27 सप्तविंशति

तेरह 13 त्रयोदशन् अटठाईस 28 अष्टाविंशति

चौदह 14 चतुर्दशन् उन्तीस 2९ नवविंशतिः, एकोनत्रिंशत्,उनत्रिंशत्

पन्द्रह 15 पञ्चदशन् तीस 30 त्रिंशत्

अव्ययम्

अधः (नीचे) वृक्षात् पत्रं अधः पतति।

उपरि (ऊपर) विमानः घनानाम् उपरि गतः। सम्प्रति गृहस्य उपरि मेघः अस्ति।

दूरतः (दूर से) कुमार्गं दूरतः त्यजेत्।

यतः (जहाँ से) यतस्त्वया ज्ञानम् अशेषमाप्तम्।

नाना (विविध प्रकार से) - नाना फलैःफलति कल्पलतेव भूमिः।

खलु (निश्चय ही) - मार्गे पदानि खलु ते विषमी भवन्ति।

समम् (के साथ, मिलकर) - यथा सर्वाणि भूतानि धरा धारयते समम्।

ननु (सन्देहसूचक प्रश्नसूचक, - ननु भवान् अग्रतो मे वर्तते। ननु समाप्तः पाठः तव?

सचमुच, अवश्य ही इत्यादि)

उपसर्ग

उपसर्गाः क्रियायोगे-

क्रिया के योग में प्र आदि को उपसर्ग कहते हैं, जैसे - प्रहार, प्रगति, प्रकृति, प्रचार, प्रदेश, प्रवाह, प्रभाव आदि प्र उपसर्ग के योग से बने हैं। इसी प्रकार-

सम् - संहार, संगति, संस्कृति, सन्देश, सन्धान, संवाद।

अनु - अनुहार, अनुगमन, अनुकरण, अनुग्रह, अनुचर अनुभूति, अनुवाद।

वि - विहार, विकृति, विदेश, विधान, विभूति, विराम, विवाद।

उपसर्गों से धातु के अर्थ बदल जाते हैं।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहारसंहार विहारपरिहारवत्।।

प्रत्यय

तव्यत् (तव्य) अनीयर् (अनीय)

ये दोनों प्रत्यय सकर्मक धातुओं से कर्म अर्थ में तथा अकर्मक धातुओं से भाव अर्थ में होते हैं। इनसे बने शब्दों का प्रयोग क्रिया तथा विशेषण के रूप में होता है।

उदाहरण - गम् + तव्यत् (तव्य)

विशेषण रूप में -

गन्तव्यः ग्रामः।

गन्तव्या नगरी।

गन्तव्यं स्थानम् ।

अन्य उदाहरण- पठ् + तव्यत् = पठितव्यम्

नी+ तव्यत् = नेतव्यम्

भुज्+ तव्यत् = भोक्तव्यम्

दा + तव्यत् = दातव्यम्

कृ + तव्यत् = कर्तव्यम्

भू + तव्यत्= भवितव्यम्

अनीयर् (अनीय) - गम् + अनीयर् = गमनीयम्

विशेषण रूप में = गमनीयः ग्रामः

= गमनीया नगरी

= गमनीयं वनम्

अन्य उदाहरण-पठ् +अनीयर् = पठनीयम्

नी + अनीयर् = नयनीयम्

भुज् + अनीयर्= भोजनीयम्

दा + अनीयर् = दानीयम्

कृ + अनीयर् = करणीयम्

क्त (त) - इस प्रत्यय का प्रयोग भूतकाल के अर्थ मे किया जाता है, इस प्रत्यय से बने शब्दों का प्रयोग क्रिया तथा विशेषण के रूप में होता है।

क्रिया रूपों में पठ् + क्त = पठितम्

विशेषण रूप में- पठितः ग्रन्थः, पठिता प=िका, पठितं पुस्तकम्।

अन्य उदाहरण - हस् + क्त = हसितम्

गम् + क्त = गतम्

नी + क्त = नीतम्

भुज् + क्त = भुक्तम्

दा + क्त = दत्तम्

कृ + क्त = कृतम्

भू + क्त = भूतम्

प्रच्छ् +क्त =पृष्टम्

ग्रह + क्त =गृहीतम्

धातुरूपाणि

वद्(बोलना)

लट्लकारः (वर्तमानकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदति | वदतः | वदन्ति |
| मध्यमपुरुषः | वदसि | वदथः | वदथ |
| उत्तमपुरुषः | वदामि | वदावः | वदामः |

लोट्लकारः (आज्ञा/प्रार्थना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदतु/वदतात् | वदताम् | वदन्तु |
| मध्यमपुरुषः | वद/वदतात् | वदतम् | वदत |
| उत्तमपुरुषः | वदानि | वदाव | वदाम |

लङ्लकारः(भूतकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवदत् | अवदताम् | अवदन् |
| मध्यमपुरुषः | अवदः | अवदतम् | अवदत |
| उत्तमपुरुषः | अवदम् | अवदाव | अवदाम |

विधिलिङ्लकारः (विधि/सम्भावना)

| | | | |
|---|---|---|---|

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | वदेत्<br>वदेः<br>वदेयम् | वदेताम्<br>वदेतम्<br>वदेव | वदेयुः<br>वदेत<br>वदेम |

लृट्लकारः (भविष्यत्काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | वदिष्यति<br>वदिष्यसि<br>वदिष्यामि | वदिष्यतः<br>वदिष्यथः<br>वदिष्यावः | वदिष्यन्ति<br>वदिष्यथ<br>वदिष्यामः |

एवमेव खेल्-खाद्-धाव्-रस्-पूज्-कूर्द-हस्-पत्-भ्रम्- लिख्-गम् (गच्छ), चर्-पठ्-क्रीड्-इत्यादीनां धातूनां रूपाणि भवन्ति।

वस्

लट्लकारः (वर्तमानकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | वसति<br>वससि<br>वसामि | वसतः<br>वसथः<br>वसावः | वसन्ति<br>वसथ<br>वसामः |

लोट्लकारः (आज्ञा/प्रार्थना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | वसतु/वसतात्<br>वस/वसतात्<br>वसानि | वसताम्<br>वसतम्<br>वसाव | वसन्तु<br>वसत<br>वसाम |

लङ्.लकारः (भूतकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | अवसत्<br>अवसः<br>अवसम् | अवसताम्<br>अवसतम्<br>अवसाव | अवसन्<br>अवसत<br>अवसाम |

विधिलिङ्लकारः (विधि/सम्भावना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | वसेत्<br>वसेः<br>वसेयम् | वसेताम्<br>वसेतम्<br>वसेव | वसेयुः<br>वसेत<br>वसेम |

लृट्लकारः (भविष्यत्काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | वत्स्यति<br>वत्स्यसि<br>वत्स्यामि | वत्स्यतः<br>वत्स्यथः<br>वत्स्यावः | वत्स्यन्ति<br>वत्स्यथ<br>वत्स्यामः |

दा (देना)

लट्लकारः (वर्तमानकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | ददाति<br>ददासि<br>ददामि | दत्तः<br>दत्थः<br>दद्वः | ददति<br>दत्थ<br>दद्मः |

लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
|---|---|---|---|
| | | | |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | ददातु/दत्तात्<br>देहि/दत्तात्<br>ददानि | दत्ताम्<br>दत्तम्<br>ददाव | ददतु<br>दत्त<br>ददाम |

लङ्लकारः (भूतकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | अददात्<br>अददाः<br>अददाम् | अदत्ताम्<br>अदत्तम्<br>अदद्व | अददुः<br>अदत्त<br>अदद्म |

विधिलिङ् (विधि/सम्भावना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | दद्यात्<br>दद्याः<br>दद्याम् | दद्याताम्<br>दद्यातम्<br>दद्याव | दद्युः<br>दद्यात<br>द्दयाम |

लृट्लकारः (भविष्यत्काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | दास्यति<br>दास्यसि<br>दास्यामि | दास्यतः<br>दास्यथः<br>दास्यावः | दास्यन्ति<br>दास्यथ<br>दास्यामः |

कथ् (कहना)

लट्लकारः (वर्तमानकालं)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | | | |

| | | | |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | कथयति<br>कथयसि<br>कथयामि | कथयतः<br>कथयथः<br>कथयावः | कथयन्ति<br>कथयथ<br>कथयामः |

लोट् लकारः (आज्ञा/प्रार्थना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | कथयतु/कथयतात्<br>कथय/कथयतात्<br>कथयानि | कथयताम्<br>कथयतम्<br>कथयाव | कथयन्तु<br>कथयत<br>कथयाम |

लङ्लकारः (भूतकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | अकथयत्<br>अकथयः<br>अकथयम् | अकथयताम्<br>अकथयतम्<br>अकथयाव | अकथयन्<br>अकथयत<br>अकथयाम |

विधिलिङ्लकारः (विधि/सम्भावना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | कथयेत्<br>कथयेः<br>कथयेयम् | कथयेताम्<br>कथयेतम्<br>कथयेव | कथयेयुः<br>कथयेत<br>कथयेम |

लृट्लकारः (भविष्यत्काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>मध्यमपुरुषः<br>उत्तमपुरुषः | कथयिष्यति<br>कथयिष्यसि<br>कथयिष्यामि | कथयिष्यतः<br>कथयिष्यथः<br>कथयिष्यावः | कथयिष्यन्ति<br>कथयिष्यथ<br>कथयिष्याम |